क्रे ५१२ क-२

ब्रह्मवैवर्तपुराणम्

१०४ पत्राणि

5422
105

पूर्ण

नं० ५४२२-घ
श्री ब्रह्मवैवर्त्तपुराणम् (पुराणेतिहासम्)
पत्राणि १०५ (सम्पूर्णम्)

ब्र
वै॰ग॰
१

ॐ श्रीगणेशाय नमः ॐ नमो भगवते वासुदेवाय ॐ
नारायणं नमस्कृत्य नरं चैव नरोत्तमं देवीं सरस्वतीं व्या
सं ततो जयमुदीरयेत् श्रीनारद उवाच श्रुतं प्रकृतिखं
डे तदमृताख्यानमुत्तमं सर्वोत्कृष्टमीप्सितं च मूढानां
ज्ञानवर्द्धनं १ अधुना श्रोतुमिच्छामि गणेशखंडमीश्वर
तज्जन्मचरितं नृणां सर्वमंगलमंगलं २ कथं जज्ञे सुर
श्रेष्ठः पार्वत्या उदरे शुभे देवी केन प्रकारेण लेभे ता
दृशं सुतं ३ सर्वांशः कस्य देवस्य कथं जन्म ललाभ सः
अयोनिसंभवः किंवा किंवा सो योनिसंभवः ४ किंवा तद्ब्रह्म
तेजो वा किंवा नैव पराक्रमः का तपस्या च किं ज्ञानं किं वा त
न्निर्मलं यशः ५ कथं तस्य पुरा पूजा विश्वेषु निखिलेषु च
स्थिते नारायणे शंभौ जगदीशे च ब्रह्मणि ६ पुराणेषु नि
गूढं च तज्जन्म परिकीर्तितं कथं वा गजवक्त्रोऽयमेकदं
तो महोदरः ७ एतत्सर्वं समाचक्ष्व श्रोतुं कौतूहलं मम
सुविस्तीर्णं महाभाग तदतीव मनोहरं श्रीनारायण उवा
च शृणु नारद वक्ष्यामि रहस्यं परमाद्भुतं पापसंतापह
रणं सर्वविघ्ननिवारणं ८ सर्वमंगलदं सारं सर्वश्रुति
मनोहरं सुखदं मोक्षबीजं च कर्ममूलनिकृंतनं ९ दै
त्यार्दितानां देवानां तेजोराशिसमुद्भवा देवी संहृत्य दै
त्यांश्च दक्षकन्या बभूव सा १० सा च नाम्ना सती देवी स्वामि

तोनिंद्याश्वशुरा देहं संत्यज्य योगेन जाता शैलप्रियोदरे १
सा च नाम्ना सती देवी शंकराय ददौ तां च पार्वतीं पर्वतो
मुदा तां गृहीत्वा महादेवो जगाम निर्जने वने ११ शाणो
रतिकरीं कृत्वा पुष्पचंदनचर्चितो सरेमे नर्मदातीरे
पुष्पोद्याने तया सह सहस्रवर्षपर्यंतं देवमानेन नार
द तयोर्बभूव शृंगारं विपरीतादिकं परं १५ दुर्गांगस्य
शमात्रेण कामेनामूर्छितः परः मूर्छितास्य शिवस्पर्शा
द्दुःखेन दिवानिशं १६ हंसकारंडवाकीर्णे पुंस्कोकिल
हतस्वने नानापुष्पविकसिते भ्रमरध्वनिसंयुते १७ सुगं
धिकुसुमाक्रेन वायुना सुरभीकृते अतीव सुखदे रम्ये स
र्वजंतुविवर्जिते १८ दृष्ट्वा तयोस्तु शृंगारं विना प्राप्य सुराः
परम् ब्रह्माणं वै पुरस्कृत्य पुनर्नारायणाश्रमे १९ तेऽ
नत्वा तं प्रणामास ब्रह्मलोहतं तमीक्षिते संतस्थुर्देवताः
सर्वाश्चित्रपुत्तलिका यथा २० ब्रह्मोवाच सहस्रवर्ष
पर्यंतं देवमानेन शंकरः रतौ रतस्य निश्चेष्टो नन्तपो वि
रराम ह २१ मैथुनस्य विराममेव देव सो जगदीश्वर किं
भूतं भविता पश्यतत्त्वः कथितं मर्हसि २२ श्रीभगवानु
वाच चिंता नास्ति जगद्भातः सर्वं भद्रं भविष्यति मयि चि
शरणापन्नास्तेषां दुःखं कृतो विधे २३ येनोपायेन तद्वी
र्यं भूमौ पतति निश्चितं तत्कुरुष्व प्रयत्नेन सांई देवग

ब्र॰
वै॰ ग॰
२

2

णेन च २४ पपात शंभोर्वीर्यं तस्मा वेश्मा उदरे यदि ततो
पत्यं च भविता सुरासुरविमर्दकं २६ तदा शक्रादयः स
र्वे सुरा नारायणाज्ञया प्रययुर्नर्मदातीरं यत्रास्ते ब्रह्मा निम्ना
लये २७ तत्रैव पर्वते शोणी वह्निस्तीरे सुराः पुरा विषण्ण
वदनाः सर्वे बभूवुर्भयकातराः २८ शक्रः कुबेरमवद-
त्कुबेरो वरुणं तथा वरुणः पवनं प्राह यमं चैव समी
रणः २९ यमस्तु प्रेरयामास हुताशं भास्करं स च भा
स्करो रजनीनाथं स्वयं प्रोवाच सादरः ३० एवं देवाः प्रेर
यंति देवोऽप्यरति भंजने हरः शृंगारभंगं चक्रे विस्मृत्या
परस्परे ३१ द्वारि स्थितो क्रशिराः शक्रो वाच महेश्वरं इं
द्र उवाच किं करोषि महादेव योगीश्वर नमोऽस्तु ते ३२
जगदीश जगद्बीज भक्तानां भयभंजन हरिर्जगाम त
त्रैवमाजगाम भयातुरः आजगाम तदा चंद्र उवाच न
तकंधरः ३५ चंद्र उवाच किं करोषि महादेव त्रिलोके
श नमोऽस्तु ते स्वात्मारामः पूर्णकामः पुण्यश्रवणकी
र्तनः ३६ इत्येवमुक्त्वा भीतश्च विरराम निशापतिः आ
गम्योवाच धीरस्तु स्वयमेव समीरणः ३७ पवन उवाच
किं करोषि जगन्नाथ जगद्वंद्य नमोऽस्तु ते धर्मार्थकाम-
मोक्षाणां बीजरूप सनातन ३८ इत्येवं स्तवनं श्रुत्वा यो
गज्ञानविशारदः रतिकामो न तत्याज शृंगारं पार्वती

भयात् ४९ दृष्ट्वा स तान्भयार्त्तोऽसौ पुनः स्तोत्रं समुपगतान्
विजहौ सा च संभोगं केटलग्नोच पार्वती ५० उत्तिष्ठतो म
हेशस्य उत्सस्य लज्जितस्य च भूमौ पपात तद्वीर्यं ततः स्कं
दो बभूव ह ५१ पश्चात्तो कथयिष्यामि कथामतिमनोह
रां स्कंदजन्मप्रसंगे च सांप्रतं वांछितं शृणु ५२ इति श्री
ब्रह्मवैवर्त्ते महापुराणे नारायणनारदसंवादे गणप
तिखंडे प्रथमोऽध्यायः १ श्रीनारायण उवाच स्मरकारति
महादेवी ददर्श पुरतः सुरान् पलायध्वमिति वा च रूप
या पार्वती भयात् १ तस्मादुत्थाय सा उग्रा न च दृष्ट्वा पुरः सु
रान् समुत्थितं कोपवह्निं स्तंभयामास देहतः २ अथाप्र
तिते देवा व्यर्थवीर्या भवेति शशाप देवी तान्देवा
न तिरुष्टा बभूव ह ३ ततः शिवः शिवां रुष्टां वासया
मास वत्सलः अतीवभीतः संत्रस्त उवाच मधुरं वचः ४
श्रीशंकर उवाच कथं रुष्टा गिरिश्रेष्ठकन्ये धन्ये मनोह
रे मम सौभाग्यरूपे च प्राणाधिष्ठात्रि देवते ५ किं ते भी
ष्टं करिष्यामि वद मां जगदंबिके ब्रह्मांडमध्ये निखि
ले किमसाध्यमिहावयोः ६ अहो निरपराधं मां प्रस
न्ना भव सुंदरि देवादज्ञातदोषस्य शांतिमकर्त्तुमर्ह
सि ७ त्वया युक्तः शिवोऽहं च सर्वेषां शिवदायकः त्वया
विना न हीशोऽहं शवतुल्यः शिवः सदा प्रकृतिस्त्वं च बु

ब्र·
वै·ग·
१
3

द्विलक्षशक्तिलक्षं च तत्र मादया त्वष्टिलक्षं च तथा तुष्टिः शांति
लक्षं तातिरेव च ४ लक्षं लक्षं ते तथा निद्रा तंद्रा श्रद्धा स्मरेश्व
रि सर्वाधारस्वरूपा त्वं सर्वबीजस्वरूपिणी ९ स्मितपूर्वं
वदवचः साकूतं सस्मेरं सशिवे त्वक्को पविष्ट सेदयं पतेन
जीवयमां मृते ११ शंकरस्य वचः श्रुत्वा कोपयुक्ता च पा
र्वती उवाच मधुरं देवी हृदयेन विदूयता १२ श्रीपार्व
त्युवाच किं त्वाहं कथयिष्यामि सर्वज्ञ सर्वरूपिणे आ
त्मारामे पूर्णकामे सर्वदेहेष्ववस्थिते १३ कामिनीमत
सकाम मप्राज्ञे स्वामिन्न वदेत सर्वेषां हृदयस्थं च हृदि
स्थं कथयामि किं १४ सगोप्यं सर्वनारीणां लज्जाजनकका
रणं अकथ्यमपि सर्वासां तथापि कथयामि ते १५ स्वके
लुमध्ये स्त्रीणां च विभवेषु सुरेश्वर स्वपुंसा समं संभोगानि
र्जनेषु परं सुखं १६ तदुःखेन च दुःखं विहितं समं तासां च
स्त्रियः कांतानां कांतविच्छेदे शोकः परमदारुणः १७ क्ल
स्यपते यथा चंद्रः तपमास्य दिने दिने तथा कांतं विना
कांताहीनकांतिः क्षणे क्षणे १८ चिंताज्वरश्च सर्वेषां सु
पतापश्च वासमंसा साधीता कांत विविच्छेद स्मरणेन च
मैथुने १९ रतिभंगो दुःखमेकं द्वितीयं वीर्यपातने दुः
खातिरेके दुःखं च तृतीयमनपत्यता २० त्रैलोक्यकांत
कांतं च लब्ध्वा लब्ध्वा न मे सुतः यासी पुत्रविहीना च जी

वर्नंतदस्मार्थकं २१ जन्मांतरसहस्रेषु पुण्यतपोदानसंभु
द्भवे सहंशजातपुत्रस्य परत्रेहसुखप्रदः २२ सुपुत्रःस्वा
मिनोंशस्य स्वामितुल्यसुखप्रदः कुपुत्रस्य कुलांगारो
मनस्तापाय केवलं २३ स्वामिस्वांशेन सुस्त्रीणां गर्भे
जन्म लभेद्ध्रुवं साध्वीस्त्रीमातृतुल्या हि सततं हितकारि
णी २४ असाध्वी वैरितुल्या हि शश्वत्संतापदायिका सुख
दुष्टायोनिदुष्टा वै वातिसार्थविस्मृता २५ कसुपायं करि
ष्यामि वद योगीश्वरेश्वर उपायसिद्धेनयसां सर्वेषां च
फलप्रदः २६ इत्युक्त्वा पार्वती देवी नम्रवक्त्रा सुरेश्वरी
प्रहस्य शंकरो देवी बोधयामास पार्वती २७ सुसत्रनी
वसुखं दुःखसंतापनाशकारणं सितंस्निग्धं स्वरूपं विरंभ
व कस्तुपचक्रमे २८ इति श्रीब्रह्मवैवर्ते महापुराणे ना
रायणनारदसंवादे गणपतिखंडे द्वितीयोध्यायः २
श्रीमहादेव उवाच शृणु पार्वति वक्ष्यामि तवमंगलभवि
ष्यति उपायतः कथं सिद्धिर्भवेदेव जगत्त्रये १ सर्ववां
छितसिद्धस्य बीजरूपे सुमंगले मनसः प्रीतिजननं
सुपायं कथयामि ते २ हरेराराधनेक्रुत्वा व्रतं कुरु वरा
नने व्रतं च पुण्यजनकं वर्षमेकं करिष्यसि ३ महाक
ठोरवीजं च वांछाकल्पतरुं परं सुखदं पुण्यकं नाम
पुत्रदं संपदांपदं ४ नदीनां च यथा गंगा देवानां च यथा

ब्र॰
वै॰ ग॰
४

हरिः वैष्णवानां यथा शंभुश्च देवीनां त्वं यथा प्रिये ५ आश्रमा
णां यथा भिक्षुस्तीर्थानां पुष्करो यथा पुष्पाणां पारिजाते
व पत्राणां तुलसी यथा ६ यथा पुण्यप्रदानां च तिथिरेका
दशी सुता रविवारश्च वाराणां यथा पुण्यप्रदः शिवे ७
मासानां मार्गशीर्षश्च ऋतूनां माधवो यथा संवत्सरो वत्स
राणां युगानां च कृते यथा ८ वृंदावनं वनानां च शतरू
पा च योषितां यथा काशीपुरीणां च सूर्यस्तेजस्विनां यथा
९ यथेंदुः सुखदानां च सुंदराणां च मन्मथः शास्त्राणां च
यथा वेदाः सिद्धानां कपिलो यथा १० हनूमान्वानराणां
च तेजसां ब्राह्मणानलयं यशोदानां यथा विद्या कवीनां
च मनोहरा ११ आत्मा कालो व्यापकानां भोगानां लोचने य
था विभवानां हरिकथा सुखानां हरिचिंतने १२ यथा ज्ञाते
वगव्यानां यथा वल्लातपस्विनां ब्रह्मतेभत्यवस्तूनां समस्ता
नां धान्यके यथा १३ पुण्यदानां यथा तोयं शुद्धानां च हुताश
नः सुवर्णं तैजसानां च मिष्टानां प्रियभाषणं १४ गरुडः
पक्षिराजानां हस्तिनामिंद्रवाहनः योगिनां च कुमारश्च
देवर्षीणां च नारदः १५ गंधर्वाणां चित्ररथो जीवो बुद्धिम
तां यथा सुकवीनां यथा शुक्रः काव्यानां च पुराणक
म् १६ स्रोतस्वतां समुद्रश्च यथा पृथ्वी क्षमावतां म
लाभानां च यथा मुक्तिर्हरिभक्तिश्च संपदाम् १७

पवित्राणां वैस्नवश्च वर्णानां ब्राह्मणो यथा विस्नुमंत्रश्च
मंत्राणां वीजानां प्रकृतिर्यथा १६ विशेषोच यथा वाणीगा
यत्रीछंदसां यथा यथा कुवेरो यक्षाणां सर्पाणां वासु
किर्यथा १९ यथा पितास्ते शैलानां गवां च सुरभिर्यथा
वेदानां सामवेदश्च तृणानां च यथा कुशाः २० सर्ववेदानां
यथा लक्ष्मीर्मनस्य शीघ्रगामिनी अक्षराणाम् अकारश्च
हितैषिणां यथा पिता २१ शास्त्राणामस्य यंत्राणां पश्तां
विस्नुपंजरः चतुष्पदानां पंचास्यो मानवो जीविनां यथा
यथा स्वांतमिंद्रियाणां मंदाग्निश्च रुजां यथा वलिनां च य
था शक्तिरंहः शक्तिमतां यथा २२ महाविराट् च स्थूलानां
सूक्ष्माणां परमाणुकः ब्रह्मा स्रष्टा च यथा स्वामिनां चक्राणां
च सुदर्शनं २४ रत्नानां श्रीरामचंद्रश्च वीराणां लक्ष्मणो य
था सर्वाधारः सर्वसारः सर्ववीजश्च सर्वदः २५ सर्व
सारो यथा कृष्णो व्रतानां पुण्यकं तथा व्रतेषु कृष्णमहाभा
गे त्रिषु लोकेषु दुर्लभं २६ सर्वसारस्य पुत्रेस्तु व्रतादेव
भविष्यति व्रतारादिश्च श्रीकृष्णः सर्वेषां वांछितप्रदः
२७ जनो यत्सेवनान्मुक्तः पितृभिः कोटिभिः सह ह
रिमंत्रमुपादाय हरिसेवां करोति यः २८ भारते जन्मस
फलं स्वात्मनः स करोति च उद्धृत्य कोटिपुरुषान्वैकुंठं
याति निश्चितं २९ श्रीकृष्णपादे दाभूत्वा स्वर्वितंत्रे च मोद

ब्र.
वै. ग.
५

5

ते सहोदरान्स्वभक्तांश्च सर्वे भूतसहचारिणः १०-स्वशिष्यं
वसुद्धृम भक्तो याति हरेः पदं तस्माद्ब्राह्मणगिरिजे ह
रिमंत्रं सुदुर्लभं ११ जपमंत्रं व्रतेनत्रपि ब्राह्मणामुक्तिकार
णं १३ स्तत्काशंकरो देवो गतवान् गिरिजया सह १२ शीघ्रं गो
जान्हवीतीरं हरेर्मंत्रं मनोहरं तस्मै ददौ च संप्रीत्या कवचं
स्तोत्रसंयुतं १३ पूजाविधाननियमं कथयामास तां मु
निः १४ इति श्रीब्रह्मवैवर्ते महापुराणे नारदसंवादे ग
णपतिखंडे तृतीयोऽध्यायः ३ श्रीनारायण उवाच श्रुत्वा
व्रतविधानं तद्दुर्गा हृष्टमानसा सर्वव्रतविधानं च
संप्रष्टुमुपचक्रमे १ पार्वत्युवाच श्रुतं व्रतविधानं हि म
या वेदविदां वर हे नाथ करुणासिंधो दीनबंधो परात्प
र २ यानि व्रतानि युक्तानि द्रव्याणि च फलानि च संयमे
नियमं भक्ष्यं विधानं तत्फलं प्रभो ३ देहि मह्यं विनीता
यै नियुक्तं सम्यग्रोहितं पुष्पोपहाराविशेषश्च द्रव्याहरण
किंकरान् ४ अन्यानि चोपयुक्तानि मया ज्ञातानि यानि
च संनियोजय तत्सर्वं स्त्रीणां स्वामीश सर्वदः ५ पिता कौ
मारकाले च सर्वपालनकारकः भर्ता मध्ये सुतः शेषे त्रि
धावस्था च योषितां ६ ततः शोकः प्राणतुल्यं ददाति त
स्वामिने सुतो स्वामी निर्हंति मामोति संमसस्वसुतेषि
यो ७ वं पुत्रयुताया स्त्री सा च भाग्यवती परा किंचिद्वि

हीनामध्याश्च सर्वे हीनोत्तमा भुवि ८ एतेषां च समीपस्था
प्रशंस्यास्ता जगत्त्रये निंदितास्तु समस्तास्सर्वमेतत्स्मृ
तेऽच्युते ९ सर्वात्मा भगवान्स्वेच सर्वसाक्षी च सर्ववित्
देहिस्महृत्पुत्रवरमात्मनिर्वृतिहेतुकं १० स्वात्मबोधानु
मानेन महात्मनि निवेदितं संवीतरागाभिप्रायं त्वं भवंतं
बोधयामि किं ११ इत्युक्त्वा पार्वती श्रीमत्पादपातत्स्वामिनः
पदे कृपासिंधुश्च भगवान्स्ववक्तुमुपचक्रमे १२ महादे
व उवाच शृणु देवि प्रवक्ष्यामि विधानं नियमं फलं फला
नि चैव द्रव्याणि व्रते योग्यानि कानि च १३ विप्राणां शतकं
शुद्धं फलपुष्पोपहारकं किंकराणां च शतकं द्रव्याहर
णकारकं १४ दासीनां शतकं दत्तं निपुणं च पुरोहितं ९
सर्वद्रव्यविधानज्ञं वेदवेदांगपारगं १५ एवं हरिभक्ता
नां सर्वेषां ज्ञानिनां वरं सनत्कुमारमत्र लेग्टहाणव्र
तहेतवे १६ देशे विशुद्धे काले च परं नियमपूर्वकं मा
घशुक्लत्रयोदश्यां व्रतारंभः शुभः प्रिये १७ गात्रे सति मे
लेहकृत्वा शिरःसंस्कारपूर्वकं उपोष्य पूर्वदिवसे च संस्थ
ताल्पयत्नतः १८ अरुणोदयवेलायां तत्पाद्यार्घ्याय
स्रवती शुचिप्रक्षालनं कृत्वा स्नात्वा च निर्मले जले १९
प्राचमय्य ततः प्रातो हरिस्मरणपूर्वकं दत्वार्घं हृदये म
त्वा गृह्य मागात्य मस्त्वरं २० पीतेव वा समीपस्थ वा उपवि

ब्र॰
वै॰ग॰
९
6

शपासनेशुचौ आचम्यतिलकंकृत्वानिवीष्यस्वाह्निकंपुरः २१
घटमारोपणंकृत्वास्वस्तिवाचनपूर्वकं पुरोहितस्यव
रणंपाद्यार्घ्याचमनीयकं २२ मधुपर्कंचस्नानीयंवस्त्रा
णिभूषणानिच स्रगंधपुष्पधूपंचदीपंनैवेद्यंचंदने २३
यज्ञसूत्रंचतांबूलंकर्पूरादिसुवासितं द्रव्याण्येतानिपू
जायांस्त्रीगणरूपाणिसदा २४ देविकिंविधिहीनेनतेनांग
हानिःप्रजायते अंगहीनेचयत्कर्मवांगहीनोयथान
रः २५ अंगहीनेनकार्येणफलहानिःप्रजायते अष्टोत्तर
शतंपुष्पंपारिजातस्यविस्रवे २६ देयंप्रतिदिनंदुर्गेस्वा
त्मनोरूपहेतवे सहस्रपत्रपद्मानांलक्षकंपुष्पलक्ष
कं २७ श्वेतचंपकपुष्पाणांलक्षमत्तमीप्सितं प्रदे
यंहरयेभक्त्यावर्णसौंदर्यहेतवे २८ भक्त्यादेयंचहर
येसुविसौंदर्यहेतवे नीलोत्पलानांलक्षंचदेयंकृष्णा
यभक्तितः २९ व्रतांगभूतंदेवेशिचक्षुषोरूपहेतवे
हिमालयोद्भवंलक्षंरुचिरंश्वेतचामरं प्रदेयंकेशवा
यवकेशसौंदर्यहेतवे ३० अमूल्यरत्नरुचिरंमुकुटका
नांसहस्रकं प्रदेयंगोपिकेशायनासिकारूपहेतवे
३१ बंधूकपुष्पलक्षंचदेयंराधेश्वरायच स्वस्यौष्ठाय
रयोश्रेववक्त्रसौंदर्यहेतवे ३२ मुक्ताफलानांलक्षंचदे
नसौंदर्यहेतवे देयंगोलोकनाथायपेशलजेभक्तिपूर्वं

के ३३ रत्नरोहककुण्डलंचगंडसौंदर्यहेतवे यदीश्व
श्वरायदातव्यंत्रिनेशैलेन्द्रकन्यके ३४ रत्नपाशकल
लंचदेयंत्वलेश्वरायच श्रोत्रायःश्वलत्रपायप्रातिसो
सिद्धिनोव्रते ३५ कर्णभूषणलक्षंचरत्नसारविनिर्मि
तं देयंसर्वेश्वरायैवकर्णसौंदर्यहेतवे ३६ माधीक
कलशानांचलक्षंरत्नविनिर्मितं देयंविश्वेश्वरायैव
स्वरसौंदर्यहेतवे ३७ सुधासंपूर्णकुंभानांसहस्रंरत्न
निर्मितं देयंकुक्षायदेवेशिवाकुक्षिसौंदर्यहेतवे ३८
रत्नप्रदीपलक्षंचगेहप्रवेशविधायिने देयंकिशोर
केशायदृष्टिसौंदर्यहेतवे ३९ सद्रत्नसाररचितप
मनालक्षसहस्रकं देयंनाणिकपालायवाक्सौंदर्य
हेतवे ४० लक्षंचरत्नपद्मानांकरसौंदर्यहेतवे देयं
गोपांगनेशायनासराणिहरिव्रते ४१ अंगुलीयक
लक्षंचरत्नसारविनिर्मितं अंगुलीनांचरूपार्थंदेयं
देवेश्वरायच ४२ मणीन्द्रसारलक्षंचश्वेतवर्णमनो
हरं देयंमुनीन्द्रनाथायनखसौंदर्यहेतवे ४३ सद्र
त्नसारहाराणांलक्षंचातिमनोहरं देयंमदनमोहा
यवक्षःसौंदर्यहेतवे ४४ सुपक्वश्रीफलानांचलक्षं
चसुमनोहरं देयंसिद्धेन्द्रनाथायस्तनसौंदर्यहेत
वे ४५ सद्रत्नवर्तुलाकारंपात्रलक्षंमनोहरं देयंप

मालयेशाय देहसनूपहेतवे ४६ सद्रत्नसाररचित
नाभीनां च सहस्रकं प्रदेयं पद्मनाभाय नाभिसौंदर्य
हेतवे ४७ सद्रत्नसाररचितरथ्यचक्रसहस्रकं नितं
बसौंदर्यार्थं च प्रदेयं चक्रपाणये ४८ सुवर्णरत्न-
लेभानां लतेव सहस्रमनोहरं प्रदेयं श्रीनिवासाय श्रो
णिसौंदर्यहेतवे ४९ शतपत्रस्थलानां च लक्षमस्त्रा
नमस्तते प्रदेयं पद्मनेत्राय पादसौंदर्यहेतवे ५० सु
वर्णरचितानां च विजनानां सहस्रकं गतिसौंदर्यहे
तवे देयं लक्ष्मीश्वराय च ५१ राजहंससहस्रं च गजे-
न्द्राणां सहस्रकं सुवर्णरचितं देयं हरये गतिहेतवे
५२ सुवर्णछत्रलक्षं च देयं नारायणाय च चित्रितर
त्नसारेण मूर्द्ध सौंदर्यहेतवे ५३ मालतीनां च कुसु
ममस्तते लक्ष्मीश्वरि देयं हृदावनेशाय स्नस सौंद
र्यहेतवे ५४ अमूल्यरत्नलक्षं च देयं नारायणाय वै
सुव्रते व्रतपूर्णार्थं शालसौंदर्यहेतवे ५५ शुद्धस्फ
टिकसंकाशं मणीन्द्रसारलक्षकं देयं मुनीन्द्रनाथा
य मनःसौंदर्यहेतवे ५६ प्रवालसारसंकाशं मणि
सारसहस्रकं देयं कृष्णाय भक्त्या च प्रियानुरागह
डये ५७ माणिक्यसारलक्षं च देयं कृष्णाय यत्नतः ज
न्मनः कोटिपर्यंतमन्नाभिसौभाग्यहेतवे ५८ कूष्मांडे

नारिकेलं च जंबीरं श्रीफलं तथा फलान्येतानि दे
यानि हरये पुत्रहेतवे ८९ रत्नेंद्रसारलं च दे
ये कृष्णाय यत्नतः असंख्यजन्मपर्यंतं स्यात्मनोथ
न हृद्ये ९० वाद्यं नानाप्रकारं च कांस्यतालादिकं
परं व्रते संप्रति हृद्यर्थं श्रीहरिं श्रावयेद्व्रती ९१ पाय
सं पिष्टकं सर्पिः शर्कराक्तं मनोहरं प्रदेयं हरये भ
क्त्या स्वात्मनो भोगहृद्ये ९२ सुगंधिपुष्पमाल्या
नां लक्षमत्तनमीक्षितं प्रदेयं हरये भक्त्या हरिभ
क्तिविहृद्ये ९३ नैवेद्यानि च देयानि स्वादूनि मधु
राणि च श्रीकृष्णप्रीतिप्राप्त्यर्थं द्वैगी नानाविधानि च
नानाविधानि पुष्पाणि तुलसीसंयुतानि च श्रीकृष्ण
प्रीतये भक्त्या व्रते देयानि सुव्रते ९५ ब्राह्मणानां स
हस्रं च प्रत्यहं भोजयेद्व्रती स्वात्मनः सस्य हृद्यर्थं व्र
ते जन्मनि जन्मनि ९६ पुष्पांजलिशतं देयं निस्मृत्य च
पूजने प्रणामशतकं देवि कर्तव्यं भक्तिहृद्ये ९७ प्र
णामो मांसहविष्यान्नमासान्यं च फलादिकं हविः पवे
जलं पलं व्रते भक्ष्यं च सुव्रते ९८ रत्नप्रदीपशतकं
वह्निं दद्याद्दिवानिशं रात्रौ कुशासनं कृत्वानितं जा
गरणं व्रते ९९ स्मरणं कीर्तनं केलिप्रेक्षणं गुणभाष
णं संकल्पो व्यवसायश्च क्रियानिष्पत्तिरेव च १०० येषु

९४

ब्र०
वै० ग०
८

8

नैविविधंन्यासेव्रतीक्रीडाविहृद्ये ज्ञानवृद्धिर्जाग
रणेमहत्तृद्धिर्मूलभोजने ११ लोभमोहकामक्रोध
भयशोकविवादकं कलहंच परिमार्ज्यं व्रतेवैपुवि
हृद्ये १२ समाप्तौचव्रतेदेवि प्रतिष्ठानदनंतरं त्रि
शतंचषष्ठ्याधिकं सहस्रंतिलहोमकं त्रिशतंचष
ष्ठ्याधिकंसहस्रंस्वर्णमेवच १५ देयाव्रतसमाप्तौच
दक्षिणाविविधोविना अन्यासमाप्तिदिवसेकथयि
ष्यामिदक्षिणां १६ एतद्व्रतफलंदेविहृद्भक्तिर्हरौ
भवेत् हरितुल्योभवेद्भोगीविख्यातोभुवनत्रये ११
सौंदर्यंस्वामिसौभाग्यमैश्वर्यंविपुलंधनं सर्ववां
छितसिद्धीनांवीजंजन्मनिजन्मनि १८ इत्येवंकथितं
देविव्रतंकुरुमहेश्वरि पुत्रस्तेभवितासाध्वीसर्वकामसवि
रामह १८ इतिश्रीब्रह्मवैवर्तेमहापुराणेनारायण
नारदसंवादेगणपतिखंडेव्रतविधानंचतुर्थोध्या
यः ४ श्रीनारायणउवाच श्रुत्वाव्रतविधानंचतुष्टाप्र
हृष्टमानसा पुनःपप्रच्छकांतंसादिव्यांव्रतकथां
शुभां १ पार्वत्युवाच किमद्भुतंश्रुतंनाथविधानंफलम
प्यच अपिकांतकथांब्रूहिकथयाव्रचकामिते २ अथ
कथा महादेवउवाच शतरूपामनोःपत्नीपुत्रदुःखेनदुः
खिता ब्रह्मणःस्थानमागत्यसाब्रह्माणमुवाचह ३ शतरूपो०

ब्रह्मन्केनप्रकारेणवंध्यायाम्रुतोभवेत् तन्मेब्रू
हिजगद्धातःसृष्टिकारणकारण ४ तज्जन्मनिःफ
लंब्रह्मन्नैश्वर्य्यधनमेवच किंचिन्नशोभतेगेहे विना
पुत्रेणपुत्रिणां ५ तपोदानोद्भवंपुण्यंजन्मांतरसुखा
वहं सुखदोमोक्षदःप्रीतिदातापुत्रस्यपुत्रिणां ६ पुत्रोपु
त्रस्तुखंदृष्ट्वाशताश्वमेधिकंफलं पुन्नामनरकत्राण
कारणंलभतेध्रुवं ७ पुत्रोपायंयदिविधेवदंनोतप
संयुतौ तदाभईनचेद्भर्तासहयास्यामिकाननं ८
गच्छामिराज्यमैश्वर्य्यधनेहंसौश्रजावहे किमेतेनाव
योस्तातविनापुत्रेरपुत्रिणां ९ अपुत्रिणोमुखंदृष्ट्वा
विद्वान्नुत्सहतेशिवे मुखंदर्शयितुंलज्जोममवामो-
रुपुत्रकः १० अथवागरलंभुक्त्वाप्रवक्ष्यामिहुताशवे
अपुत्रंपुत्रमशिवंगच्छामिसुखीविहीनकं ११ इत्येवमु
क्त्वासासाताद्भुलाणःवकरोदह कृपानिधिस्तांदृष्ट्वा
प्रवक्तुमुपचक्रमे १२ ब्रह्मोवाच शृणुवत्सेप्रवक्ष्यामि
पुत्रोपायंसुखावहं सर्वैश्वर्य्यादिवीजंवसर्ववांछाप्रदं
शुभं १३ माघशुक्लत्रयोदश्यांव्रतमेतत्सुपुण्यकं क
र्त्तव्यंशुद्धकालेचकल्याणायनदेहिनवे १४ संवत्सरंव्रतं
कुर्याद्विस्तृतत्सपराक्रमे १५ ब्राह्मणश्चवचःश्रुत्वासा
कृत्वाव्रतमुत्तमं प्रियव्रतोनामनृपादौलेभेपुत्रमनोहृ

ब्र.
वै. ग.
५

9

रौ १७ व्रतं कृत्वा देवहूती लेभे सिद्धेश्वरं सुतं नाराय
णांशं कपिलं पुण्यकं पुण्यदं शुभं १८ अरुंधतीदं कृत्वा
वा लेभे शक्तिं सुतं शुभं शक्तिकांता व्रतं कृत्वा सुतं लेभे
पराशरं १९ अदितिश्च व्रतं कृत्वा लेभे वै वाच्युतं सुतं श
चीजयंतं सुतं लेभे कृत्वेदमीश्वरं २० उत्तानपादप
त्नीदं लेभे च ध्रुवमुत्तमं सूर्यपत्नी मनुं लेभे कृत्वेदं व्रत
मुत्तमं २१ अग्निपत्नी सुतं चेदं लेभे कृत्वेदमुत्तमं लेभे
चांगिरसः पत्नी कृत्वेदं व्रतमुत्तमं बृहस्पतिं सुरगुरुं
पुत्रमस्य प्रभावतः भृगोर्भार्या व्रतं कृत्वा लेभे दैत्यगु
रुं सुतं २२ नारायणांशं शुक्रं च सर्वतेजस्विनां वरं इ
त्येवं कथितं देवि व्रतानां व्रतमुत्तमं २४ त्वमेवं कुरु कल्य
णि हिमालयसुते शुभे साध्वी राजेंद्रपत्नीनां देवीनां
च सुतावहं २५ व्रतमेतन्महासाध्वि साध्वीनां प्राणतः
प्रियं व्रतस्यास्य प्रभावेण स्वयं मे पा गणेश्वरः २६ ईश्व
रः सर्वदेवानां तव पुत्रो भविष्यति इत्युक्त्वा शंकरस्तत्र
विरराम च नारद २७ व्रतं चकार सा देवी प्रहृष्टा शंक
राज्ञया इत्येवं कथितं सर्वं किं भूयः श्रोतुमिच्छसि सु
खदं मोक्षदं सारं गणेशजन्मकारणं २८ इति श्री ब्रह्म
वैवर्ते महापुराणे नारायणनारदसंवादे गणपति
खंडे व्रतकथने पंचमोऽध्यायः ५ शौनक उवाच

शौनक उवाच नारायणवचः श्रुत्वा नारदो हृष्टमानसः
किं पप्रच्छ पुनः साधो तन्मे ब्रूहि तपोधन १ सूत उवाच
नारायणवचः श्रुत्वा नारदो हृष्टमानसः व्रतारंभवि
धानं च प्रष्टुमुपचक्रमे २ नारद उवाच कृतं केन
प्रकारेण व्रतमेतं शुभावहं तन्मे ब्रूहि मुनिश्रेष्ठ पा
र्वत्या भर्तृराज्ञया ३ ललाभ जन्म गोपीशः कृतेस्य व्रत
यात्रेत व्रतं केन प्रकारेण ततः शंसितुमर्हसि ४ श्री
नारायण उवाच कथयिष्ये कथां दिव्यां विधानं च व्रत
स्य च स्वयं विधातानपसां जगाम तपसे शिवः ५ हरेरा
राधनव्यग्रा मूर्तिभेदधरो हरिः हरिभावनशीलश्च
हरिस्तुतिपरायणः ६ परमानंदसंपूर्णस्वज्ञानानंदस
नातने दिवानिशं जनो याति हरिमंतर्बहिः स्मरन् ७ श
िष्टमनसा देव्या पार्वती भर्तृराज्ञया किंकरान्प्रेरया
मास विशेषव्रतहेतवे ८ आनीय सर्वद्रव्याणि व्रतो
पयोगिकानि च व्रतं कर्तुं समारेभे सम्भ्रमात्साशुभतेण
९ सनत्कुमारो भगवानाजगाम विधेः सुतः मूर्तिमा
न्तेजसां राशिः प्रज्वलज्ज्वलिततेजसा १० ब्रह्मा जगाम हृष्ट
श्च ब्रह्मलोकात्सभार्यकः अत्रिब्रह्मो हि भगवानाजगा
म महेश्वरः ११ विष्णुः क्षीरोदशायी च सलक्ष्मीकश्चत
र्भुजः सनकश्च सनंदश्च कपिलश्च सनातनः आसुरि

ब्र॰
वै॰ ग॰
१०

10

स्वकन्तर्हे सोवोढुः पंचशिखो महागिरिः १४ यतिश्च सस्मृति
श्चैव सशिष्यश्च सहानुगः पुलहश्च पुलस्त्यश्च वसिष्ठो
भृगुरंगिराः १५ अगस्त्यश्च प्रचेताश्च दुर्वासाश्च्यवनस्त
था मरीचिः कश्यपश्च कण्वो जरत्कारुश्च गौतमः १६
बृहस्पतिरुतथ्यश्च संवर्तः सौभरिस्तथा जाबालो जम
दग्निश्च जैगीषव्यश्च देवलः १७ गोकामुखश्च करावेः पा
रिभद्रः पराशरः विश्वामित्रो वामदेव ऋष्यशृंगो विभा
ण्डकः १८ मार्कण्डेयो मृकण्डुश्च पुष्करो लोमशस्तथा
कौत्सो वत्सश्च दक्षश्च कालाग्निश्च मर्षणः १९ कात्यायनः
कणादश्च पाणिनिः शाकटायनः शंकुरापिशलिश्चैव
शाकल्यः शालिपश्च २० एते चान्ये च बहवः सशिष्याश्च
ययोस्तुने श्रावो वयमि पौत्रो वनर नारायणावृषी २१ दि
क्पालाश्च तथा देवा यक्षगन्धर्वकिन्नराः प्राजग्मुः पर्व
ताः सर्वे सगणाः पार्वतीव्रते २२ हिमालयः शैलराजः
सापत्यश्च सभार्यकः सगणः सानुगश्चैव रत्नभूषण
भूषितः २३ महासंभृतसंभारो नानाद्रव्यसमन्वितः
मालामाणिक्यरत्नानि वज्रतोपमणिकानि च २४ नानाप्र
कारवस्तूनि जगतां दुर्लभानि च लक्षं च गजरत्नानाम
श्वरत्नं त्रिलक्षकं २५ दशलक्षं गवां रत्नं शतलक्षं सुव
र्णकं स्वकं हीरकाणां च स्पर्शानां च वर्तते च वव २६ मुक्ता

नोचचतुर्लक्षंकोटिभानोःसहस्रकं स्वस्वादमिष्टद
व्याणांलक्षभाराणिकोटकी २७ अनेनरत्नप्रभव
भ्राजमानमहतावृते ब्राह्मणाःमनवःसिद्धानानावि
द्याधरास्तथा २८ भित्तयोभित्तिकाश्चैवनंदिनःपार्व
तीवृते विद्याधरीनर्तकीचनर्तकोऽप्सरसांगणाः २९
नानाविधायभोज्याभ्राजमस्तुःशिवमंदिरे कैलासराज
मार्गेवेदनेनसुसंस्कृते ३० आम्रपल्लवसूत्रक
दलीस्तंभशोभिते दूर्वाधान्यपर्णैर्लाजफलपुष्पवि
भूषिते निर्मितेपद्मरागेणदिव्यसौवर्णसुदा उच्चैः
सिंहासनेस्थितेपूजिताःशंकरेणच ये कैलासवासि
नःसर्वेपरमानंदसंस्कृताः दानाध्यक्षःसुनासीरः
कुवेरःकोषरक्षकः ३३ अन्वेष्टाचवरुणोसूर्यःपरि
वेष्टाजलाधिपः दध्नोनवःसहस्राणिकुंभानांचश
तानिच ३४ लक्षाणिचैवतक्राणांबभूवुःपार्वतीवृ
ते सहस्राणिघृतानांचगुडानांचशतानिच ३५ सा
धीनांचसहस्राणितैलानांचशतानिच पीयूषाणां
वकुंभानिशतलक्षाणिनारद ३६ मिष्टान्नानांशर्क
राणांबभूवुर्लक्षराशयः पक्वगोधूमचूर्णानांहुता
क्तानांचनारद ३७ स्वस्तिकानांचसूपानांबभूवुर्लक्ष
राशयः गुडसंस्कृतलाजानांबभूवुःकोटिराशयः ३८

ब्र॰
वै॰ग॰
१२

शालीनांइक्षुकानांचराशीनांदशकोटयः तंदुलानां
चराशीनामसंख्यानविद्यते ४५ स्वर्णरौप्यप्रवाला
नांमणीनांचमहापुंजं बभूवुःपर्वतास्तत्रैकैलासपा
र्वतीव्रते ४० पापसंपिष्टकैश्चैवशाल्यन्नैस्समनोहरं
चकारलक्ष्मीःपाकंचव्यंजनेहृतसंहृते ४१ बुभुजेदे
वर्षिगणैःसार्द्धंनारायणःस्वयं बभूवुलितविप्रायप
रिवेषणकारकाः ४२ तांबूलंचददौतेभ्यःकर्पूरादिसु
वासितं रत्नसिंहासनेतेभ्योविश्वलताःसल्लके ४३
रत्नसिंहासनस्थश्चविष्णुर्लीलादशापिते सेव्यमानःपा
र्षदैश्चसस्मितैःश्वेतचामरैः ४४ ऋषिभिःस्तूयमाने
श्चसिद्धैर्देवगणैस्तथा विद्याधरीणांनृत्यंप
तेसस्मितःसदा ४५ गंधर्वाणांचसंगीतंशृण्वतेचमनो
हरं पंचवक्त्रःशंकरोब्रह्मणाब्रह्मलेशेभक्तिपूर्वकं ४६ ब्रह्म
णाप्रेरितोपुत्रोब्रह्मणःकतत्वमीप्सितं देवर्षिगणपूर्णा
यांसभायांसपुटांजलिः ४७ महादेवउवाच महीयप्र
र्थ्यतेनाथश्रीनिवासगुणप्रभो नाचस्वरूपतपसांक
र्मणांचफलप्रद ४८ व्रतानांजपयज्ञानांपूजानांसर्व
पूजित सर्वेषांबीजरूपोसिवांछाकल्पतरोहरे स्वप्राण
कव्रतंकर्तेव्रतंतिनक्षितिपार्वतीपुत्रार्थिनीसशोकार्ता
हृदयेनविदूयता रतिभंगेकृतेदेवैर्बीजवर्गेष्ववादिना

प्रबोधिता मया साध्वी विविधैर्वचनामृतैः ५१ मन्त्रेऽस्वा
मिसौभाग्यं सत्रता याचते व्रते नाभ्यां विना न संतुष्टा स्व
प्राणांस्त्यक्तुमिच्छति ५२ पुरा त्यक्ता स्वदेहं च पितुर्यज्ञे च
मानिता मन्निंदया शैलाद्देहे पुनर्जन्मलब्धा भसा ५३ स
र्वज्ञानासि त्वं तात सर्वज्ञं त्वां वदामि किं कारणं वस्तुनस्त
परिणामसुखप्रदं ५४ दुर्निर्वापः स्मरः सर्वैर्धीरोदात्तस्वभा
वश्च चापलः दुस्त्याज्यो योगिभिः सिद्धैः स्माभिश्च तपस्वि
भिः ५५ जितेन्द्रियैर्जितक्रोधैः स्त्रीरूपे मोहकारणे स
र्वमायाकरंडं च कामवर्द्धनकारणं ५६ ब्रह्माण्डं कामदे
वस्य दुर्भेद्यं जयकारणं संनिर्मितं च विधिवत्सर्वाधि
वासि पूर्वकं ५७ मोक्षद्वारकपाटं च हरिभक्तिनि
रोधनं संसारबंधनस्तंभरज्जुरूपमकृत्रिमं ५८ वैरा
ग्यनाशबीजं च शश्वद्रागविवर्द्धनं तपनं साहसानां
च दोषाणामालयं सदा ५९ अप्रमत्तप्रयत्नेन त्रैवस्व
यं कपटमूर्तिमत् अहंकाराश्रमः शश्वद्द्विष्टं कुंभस
धासु चै ६० सर्वैरसाध्यमानं च दुराराध्यं च सर्वदा स्व
कार्यसाधनाराध्यं कलहांकुरकारणं ६१ सर्वैर्निवेदि
तेनाकर्तुं मयैव क्रम महेशि कार्यं सर्वं परामर्शोपरिणाम
सुखावहं ६२ श्रीनारायण उवाच इत्येवमुक्त्वा भगवा
न्निरीश्वरः सनेष्टं वं विरराम सभामध्ये सस्मितास्य कम

ब्रै॰
वै॰ ग॰
१२

12

लापतिः ९३ शंकरस्य वचः श्रुत्वा प्रहस्य जगदीश्वरः
हितं मितं च वचनं प्रवक्तुमुपचक्रमे ९४ विष्णुरुवाच
व्रतं पुण्यकं व्रतसारं च सती संतानहेतवे स्वामिसौभाग्य
बीजं च पत्नी तत्कर्तुमिच्छति ९५ सर्वाराध्यं दुराराध्यं स
र्वकामफलप्रदं शुभदं शिवसारं च मा तद्दं पार्वतीश्वर
सर्वेश्वरो व्रताराध्यो गोपीशस्त्रिगुणात्परः गोलोकना
थो भगवान् पूर्णब्रह्मसनातनः ९७ सर्वादृश्यः सर्वदृश्यः
सर्वस्वेच्छामयः परः आत्मा साक्षिस्वरूपश्च ज्योतीरूपः स
नातनः ९८ निराश्रयश्च निर्लिप्तो निरुपाधिर्निरामयः
भक्तप्राणश्च भक्तेशो भक्तानुग्रहकातरः ९९ दुराराध्योऽपि
योमेधो भक्तानामर्थसाधकः भक्ताधीनोऽपि भगवान्
सर्वदोऽपि हि निष्फलः १०० यस्यैककलांशेन ब्रह्मवि
ष्णुमहेश्वराः महान्विराट् तदंशश्च निर्लिप्तः प्रकृतेः
परः १०१ अव्ययोऽविग्रहस्थोऽपि भक्तानुग्रहविग्रहः या
होग्रहो ग्रहाणां च ग्रहनिग्रहकारकः १०२ त्रिकोटिज
न्मसाध्यश्च न साध्यो भारते विना लब्ध्वा हि भारते जन्म
हरिभक्तिं लभेन्नरः १०३ सेवनं तु देवानां कृत्वा सम
ग्रजन्मसु सूर्यमंत्रमवाप्नोति केवलं सततं द्विजाः १०४
सूर्यमंत्रं समाराध्य मायां नारायणीं परां नारायणक
लासेवां समवाप्नोति मानवः १०५ कलौ निषेव्य वर्षं च

९९

गुणंलेभेसद्गुलंभो कृष्णभक्तिमवाप्नोतिभक्तसंसर्ग
हेतुकी ७६ संप्राप्य भक्तिं निष्पक्वां प्राप्नोत्यात्मोपभा
वेन प्राप्नोति परिपक्वां च भक्तिं भक्तनिषेवया ७७ तदा
भक्तप्रसादेन देवानामाशिषा शिव श्रीकृष्णमंत्रं प्राप्नो
ति निर्वाणफलदं परं ७८ कृष्णव्रतं कृष्णमंत्रं सर्वकामफ
लप्रदं कृष्णतल्लोभवेद्भक्तोऽचिरं कृष्णनिषेवया ७९ म
हति प्रलये पातः सर्वेषां शाश्वते निश्चितं न पातः कृष्णभ
क्तानां सत्यं नामविनाशिनां ८० अविनाशिनि गोलोके मो
दंते कृष्णकिंकराः हसंति ते च निश्चितं देवान्ब्रह्मादि
कान् शिव ८१ ते संहर्ता च सर्वेषां न भक्तानां महेश्वर माया
मोहयते सर्वान्भक्तान्नहि कृपामय ८२ माया नारायणी
माता सर्वेषां कृष्णभक्तिदा न कृष्णभक्तिं प्राप्नोति विना मा
यानिषेवनं ८३ सा च नारायणी माया मूलप्रकृतिरीश्वरी
कृष्णप्रिया कृष्णभक्ता कृष्णतुल्या विनाशिनी ८४ सा च ते
जःस्वरूपा च स्वेच्छाविग्रहधारिणी आविर्भूता च देवानां ते
जसा हरनिग्रहे ८५ निहत्य दैत्यान् सर्वांश्च दलपत्नी च
भारते ललाभ दक्षतपसा जन्म चानेकजन्मनः ८६ स
ष्टा देवप्रबन्धे सा सती तत्र तनुं दया जगाम देवी गोलो
कं कृष्णशक्तिः सनातनी ८७ दृष्ट्वा विग्रहं तस्य गुणरू
पाश्चर्यपरं प्राप्य पुन्याग्रतं तनिभृसौभूः पुराणस्मरः ८८

ब्र.
वै. ग.
१३

13

प्रबोधिनीमघायां च श्रीशैले च सरित्तटे ललाभ जन्म सा
शैलकान्ताया जठरे शुभे ८९ करोति पुण्यके साध्वी सर्व
नामव्रतं शिवा राजसूयसहस्राणां पुण्यं शंकर पुण्यके
९० राजसूयसहस्राणां व्रतेयत्रयनव्ययः न साध्यं सर्व
साध्वीनां व्रतमेतत् त्रिलोचन ९१ स्वयं गोलोकनाथश्च
पुण्यकस्य प्रभावतः पार्वत्या गर्भजातश्च तव पुत्रो भवि
ष्यति ९२ स्वयं देवगणानां च यस्मादीशः कृपानिधिः ग
णेश इति विख्यातो भविष्यति जगत्त्रये ९३ यस्य स्मरण
मात्रेण विघ्नो विघ्नाय भवेद्ध्रुवं जगतां हेतुना तेन विघ्नवि
घ्नाभिधो विभुः ९४ नानाविधानि द्रव्याणि यस्य जेयानि
पुण्यके भुक्त्वा लम्बोदरं तं चैतेन लम्बोदरः स्मृतः ९५ श
निदृष्ट्या शिरश्छेदात् गजवक्त्रेण योजितः गजाननः शि
शुस्तेन निघ्नकः केन वार्यते ९६ परशुना परशुरामा
देकदन्तस्य खण्डने भविष्यति निघ्नके नैवैकदन्ताभि
धः शिशुः ९७ पूज्यश्च सर्वदेवानामस्माकं जगतां विभुः
सर्वाग्रपूजनं तस्य भविता मद्वरेण वै ९८ पूजासु स
र्वदेवानामग्रे संपूज्यते जनः पूजाफलमवाप्नोति नि
र्विघ्नेन वृथान्यथा ९९ गणेशं च दिनेशं च विह्नं शि
भुजतापने दुर्गामेतान् हि संसेव्य पूजयेद्देवतान
रः १०० गणेशपूजनेन विघ्ननिघ्नं त्रिजगतां भवेत्

नित्यो विधिः सूर्यपूजायां शम्भुर्विः श्रीविष्णुपूजने १ मोक्षस्य पा
पनाशस्य यशस्यैश्वर्यवर्द्धने तत्त्वज्ञाने सुतत्त्वानां बीजं शं
करपूजने २ सद्बुद्धिस्त्रीसमृद्धीनां तत्पूजा वै सुकारणं ह॰
रिभक्तिप्रदे चैव पार्वत्यर्चने शिवे ३ विधानसंस्कृताश्चैव
नानेभ्यस्त्यलभेन्नरः दाता भोक्ता च भवति शोकस्मिन्निश्चवान्
न् ४ विपरीतं त्रिजगतामेतेषां पूजनं विना एवं क्रमो म
हादेव कल्पे कल्पे विनिश्चितं ५ एते ह्येव विद्यमाना नित्याः
स्वेच्छापरं पराः आविर्भावतिरोभावौ चैतेषामीश्वरेच्छया
इत्युक्त्वा श्रीहरिस्तत्र विरराम सभागताः प्रहृष्टा देवता
विप्राः पार्वत्या सह शंकरः ७ इति श्रीब्रह्मवैवर्ते महापु
राणे नारायणे नारायणनारदसंवादे गणपतिखण्डे पु
ण्यकव्रताज्ञाग्रहणं नाम षष्ठोऽध्यायः ६ श्रीनारायण उवा
च हरेराज्ञां समादाय हरः प्रहृष्टमानसः उवाच पार्वती
श्रीमान् हरिसंलापमंगले १ शिवाज्ञां तां समादाय शिवा
प्रहृष्टमानसा वाद्यं च वादयामास मंगलं मंगलव्रते २
सुस्नाता सुदती शुद्धा बिभ्रती धौतवाससी संस्थाप्य रत्न
कलशं शुक्लधान्योपरि स्थितं ३ आम्रपल्लवसंयुक्तं फ
लान्वितसुशोभितं चंदनागुरुकस्तूरीकुंकुमेन विभू
षितं ४ रत्नासनस्था रत्नेश्वरत्नोद्भवसुतामती रत्नसिं
हासनस्थं च संपूज्य च पुरोहितं ५ चंदनागुरुकस्तूरीर

ब्र॰
वै॰ ग॰
१४

15

रत्नभूषणभूषितं संस्थाप्य पुरतो भक्त्या दिक्पालान्र
त्नभूषितान् ६ देवतांतरोऽस्त्रनागांश्च समर्च्य विधिवोपि
तं समर्च्य परया भक्त्या ब्रह्मविष्णुमहेश्वरान् ७ वेदना
गुरुकस्तूरिकाकुंकुमेन विराजितान् वह्निपुंडांश्च वस्त्रेण
सद्रत्नभूषणेन च ८ पूज्या वद्धैर्विविधैः संपूज्य प्रा
णपकेतने समारेभे व्रतं देव्या स्वस्तिवाचनपूर्वकं ९
श्रावणस्याभीष्टदेवते श्रीकृष्णे मंगले च घटे भक्त्या ददौ क्र
मेणैव सोपचाराणि षोडश १० यानि व्रतविधेयानि दे
यानि विविधानि च प्रदत्तानि सर्वाणि प्रत्येकं फलदानि
च ११ व्रतोक्तमुपहारं च ददौ लेभे भुवनत्रये तद्वसर्वं ददौ
भक्त्या सुव्रता सुव्रते सती १२ दत्वा द्रव्याणि सर्वाणि वे
दमंत्रेण सा सती होमं च कारयामास त्रिलतं तिलस
र्पिषा १३ ब्राह्मणान्भोजयामास देवतातिथिपूजिता
न् कर्तव्यमेव कर्तव्ये सुव्रते सुव्रता सती १४ प्रत्य
हं सा यथा नैव चकार पूर्णवत्सरं समाप्तिदिवसे
विप्रस्य ब्रवाच पुरोहितः श्रेते च मोहितां दृष्ट्वा प्रह
स्य मुनिपुंगवः सुव्रते सुव्रते महादेहीति पतिद
त्तिणं श्रुत्वा पुरोहितोक्तं सा विलप्य स्वरं समहे १५
मूर्छां प्राप्य महामायामोहिता सा च चेतसा श्रेते
च मोहितां दृष्ट्वा प्रहस्य मुनिपुंगवः १६ ॥

शंकरं प्रेरयामास ब्रह्मा विष्णुश्च नारदः संप्रेरितः शि
वैस्तैश्च शिवां बोधयितुं तदा १९ शिवः समुद्यमं चक्रे प्र
वक्तुं वदतां वरः शिव उवाच उत्तिष्ठ भद्रे भद्रं ते भवि
ष्यति न संशयः २० सांप्रतं चेतनां कृत्वा मदीयं वचनं
शृणु शिवः शिवां तामित्युक्त्वा पुष्पकं ठोघृतालकं २
वत्सस्थापयामास कारयामास चेतनां हितं सम्यक् मितं
सर्वं परिणामसुखावहं २१ यज्ञस्य कं च फलदं प्रवक्तु
पचक्रमे शृणु देवि प्रवक्ष्यामि यद्वेदेन निरूपितं २२ स
र्वेषाममतमिष्टं च धर्मार्थं धर्मसंसदि सर्वेषां कर्मणां दे
वि सारभूता च दक्षिणा २३ यज्ञो दाफलदानीसं धर्मिष्ठे
धर्मकर्मणि देवे वा पैतृके वा नित्ये नैमित्तिके प्रिये २४
यत्कर्म दक्षिणाहीनं तत्सर्वं निष्फलं भवेत् दाता च कर्म
णा तेन कालसूत्रं व्रजेद्ध्रुवं २५ देहान्ते दैन्यमाप्नोति श
त्रुणा परिपीडितः दक्षिणा पितमुद्दिश्य तत्कालं तेन न
दीयते तन्मुहूर्ते व्यतीते तु दक्षिणा द्विगुणा भवेत् चतु
र्गुणा दिने तीते पक्षे शतगुणा भवेत् २७ मासे पंचशत
गुणा षण्मासे तच्चतुर्गुणा संवत्सरे व्यतीते तु तत्कर्म
निष्फलं भवेत् २८ दाता च नरकं याति यावद्वर्षशतत्र
मे पुत्रपौत्रधनैश्वर्यं त्तयमाप्नोति मानकात २९ धर्मो
नष्टो भवेत्तस्य यत्हीने च कर्मणि विष्णुरुवाच एतच्च

ब्र·
वै·ग·
१५

15

धर्मं धर्मज्ञे धर्मिष्ठे धर्मकर्मणि ३० सर्वेषांच भवेद्दत्ताश्च
धर्मपरिरक्षणे ब्रह्मोवाच यस्य केन निमित्तेन न धर्मं
परिरक्षति धर्मे नष्टे च धर्मज्ञे तस्य सर्वं विनश्यति ३१
धर्म उवाच मां रक्ष यत्नतः साध्वि प्रदायपति दक्षिणां
मयि स्थिते महासाध्वि सर्वं भद्रं भविष्यति ३२ देवा ऊचुः
धर्मं रक्ष महासाध्वि कुरु पूर्णं व्रतं सति वयं न व व्रते
पूर्णे कर्मणि पूर्णमानसं ३३ मुनय ऊचुः कृत्वा साध्वि पू
र्णाहामे देहि विप्राय दक्षिणां स्थितेष्वस्मासु भुवि ते कि
मभद्रं भविष्यति ३४ सनत्कुमार उवाच शिवे शिवे दे
हि मह्यं भवेद्व्रतफलं व्रते स्वचिरं संचितस्यापि स्वात्मन
स्तपसः फलं ३५ कर्मणि दक्षिणे साध्वि याजकस्यापि तत्फ
लं प्राप्नोति यजमानस्य संपूर्णं कर्मणः फलं ३६ पार्वत्युवा
च किं कर्मणा मे देवेशाः किं मे दक्षिणया सुते किं पुत्रेण
च धर्मेण यत्र भर्ता स दक्षिणा ३७ पतिभूमिर्मया त्यक्ता
यदि यत्नस्वदेवतं गते च कारणे कार्यं कुतः तस्य कृतः
फलम् ३८ प्राणास्त्यक्ताः स्वेच्छया चेद्देहेन किं प्रयोज
नम् दृष्टिशक्तिविहीनेन चक्षुषा किं प्रयोजनम् ३९
शतपुत्रसमा नारी साध्वी या च स्वरेश्वराः यदि भर्ता
व्रते दत्तं किं व्रतेन सुतेन वा ४० भर्तारेशस्सुतनयः
केवलं भर्तृमूलकः :: :: :: ::

यत्रमूलेभवेन्नष्टं तत्रशाखाफलं च निष्फलं ४१ विमृक्षवा
व पुत्रादपिपरः स्वामी धर्मस्य स्वामिनः परः नष्टे धर्मे
व धर्मिष्ठे स्वामिना किं सतेनवा ४२ ब्रह्मोवाच स्वामि
नश्च परो धर्मो धर्मात्मानं च सूचने सम्यसंकल्पितं कर्म
नत्वश्रेष्ठं कुरुत्वते ४३ पार्वत्युवाच निरूपितश्च वेदेषु
स्वधर्मो धनवो धर्तो ४४ धर्मउवाच पत्नीविनान्यतस्मि
न्विधिस्वामिन्नेदानमत्तमे दंपती ध्रुवमेकांगे द्वयोर्दे
ताचैतौ समौ पार्वत्युवाच पिता ददाति जामात्रे सवरः
स्तातितत्कृतौ नतस्युतं विपरीतंच श्रुतौ श्रुतिपरायणाः
४५ देवाऊचुः बुद्धिसत्त्वपार्वत्युगौ बुद्धिमंतो वयं त्वया वे
दत्तं वेदवादेषु केवा तां जेतुमीश्वराः ४६ निरूपिता
पुराणके तत्वते स्वामी च दक्षिणा श्रुतो श्रुतो यः स धर्मो
विपरीतो ह्यधर्मकः ४७ पार्वत्युवाच केवलं वेदमा
श्रित्यकः करोति विनिर्णयं बलवान् हि लौकिको वेदाल्लो
कावारं वकस्त्यजेत् ४८ वेदे प्रकृतिपुंसोश्च गरीयान्पु
रुषो ध्रुवं निवेदिताः सुराः प्रज्ञावला हे कथयामि किं
४९ बृहस्पतिरुवाच न पुमांसं विना सृष्टिर्न सापिप्र
कृतिं विना स्त्रीकृत्स्नश्च द्वयोः श्रेष्ठः समो प्रकृतिपुरुषो
५० पार्वत्युवाच यः कृत्स्नः प्रकृतेः श्रेष्ठो सोंशेन सगुणः पु
मान् पुमान् नारीं प्रकृतेस्तथापि नतत्समा ५१ पतिस्मि

ब्र॰
वै॰ ग॰
१९

तेनैव देवा मुनयस्तत्रैव संसदि रत्नेन्द्रसारनिर्माणमाका
शे दृष्ट्वा रथं ५४ पार्षदैश्च परिवृतं सर्वैः श्यामचतुर्भुजैः
वनमालापरिवृतै रत्नभूषणभूषितैः ५५ अवरुह्य त
तोयानादाजगाम सभातले वह्निशुक्लांशुकैः शुक्ले देवे वै
कुण्ठवासिने ५६ शङ्खचक्रगदापद्मधरमीशं चतुर्भुजं
लक्ष्मीसरस्वतीकान्तं शान्तं च मनोहरं ५७ स्वेच्छाम
यमभक्तानामदर्शं कोटिजन्मभिः कोटिकन्दर्पलीलाभं
कोटिचन्द्रसमप्रभं ५८ अमूल्यरत्नरचितचारुभूषण
भूषितं सेव्यं ब्रह्मादिदेवैश्च सेवकैः सततं स्तुतं तदा
शङ्खाद्यारिकैर्देवैर्वाहितं च सुरर्षिभिः वासयामासुरेनं च
रत्नसिंहासने वरे सेव्यं ब्रह्मादिदेवैश्च सेवकैः सततं
स्तुतं ५९ ततः प्रणेमुः शिरसा ब्रह्मविष्णुशिवादयः
सपुटाञ्जलयः सर्वे पुलकाङ्गाश्रुलोचनाः ६१ सस्मितस्ता
न्पप्रच्छ सर्वे मधुरया गिरा प्रबोधिताः सुराध्यक्षः प्रव
क्तुमुपचक्रमे ६२ श्रीनारायण उवाच सन्तुष्ट्या तु हि
मतो न वक्तुं सुचितं सुराः सर्वे पातालानया विश्वेशक्ति
मतो हि जीविनः ६३ ब्रह्मादितृणपर्यन्तं सर्वं प्राकृतिकं
जगत् सत्यं सत्यं विनाशं च मया शक्तिः प्रकाशिता आ
विर्भूता च सा मत्तः सृष्टौ देवी मदिच्छया तिरोहिता सा शे
षे च सृष्टिसंहरणे मयि ६५ सृष्टिकर्त्री च प्रकृतिः सर्वेषां

जननी परा मम तुल्या च मन्माया तेन नारायणी स्मृता १७
स्वचिरं तप्यमानं संशोभना ध्यायता च मां तेन तस्यै मया
दत्तानि तपसां फलरूपिणी १८ व्रतेन च लोकसिद्ध्यर्थमस्या
न स्वार्थमेव च स्वयं व्रतानां तपसां फलदात्री जगत्त्रये
१९ मायया मोहिताः सर्वे न ह्यस्या वा त्वं वै व्रते साध्यमस्या
व्रतफलं कल्पे कल्पे पुनः पुनः २० सुरेश्वरा मद्देशाः स्व
त्वविस्त्रमहेश्वराः कलांशरूपास्ते सर्वे जीविनश्च स्वराद
यः २१ स्वदा विना च घटे कर्तुं कुलालश्च यथा क्षमः विना
स्वर्णं स्वर्णकारः कुंडलं कर्तुमक्षमः २२ शक्तिप्रधानाः सृ
ष्टिश्च सर्वदर्शनसंमता अहमात्मा हि निर्लिप्तो दृश्यमाणो
वदेहिनां २३ देहाः प्राकृतिकाः सर्वे नश्वराः पांचभौति
काः अहं नित्यः शरीरी च भानुवित्यग्रहविग्रहः २४ सर्वाधा
रा च प्रकृतिः सर्वात्माहं जगत्सु च अमितात्मा मनो ब्रह्मा
ज्ञानरूपो महेश्वरः पंच प्राणाश्च ये विष्णुर्बुद्धिः प्रकृतिरीश्व
री शक्तिर्निद्रादयश्चैताः सर्वाश्च प्रकृतेः कलाः २५ सा च
गोलोके कल्याणमिति वेदनिरूपिते अहं गोलोकनाथश्च
वैकुंठेशः सनातनः २७ गोपीगोपैः परिवृतस्तत्रैव द्वि
भुजः स्वयं चतुर्भुजोऽनंतदेवेशः लक्ष्मीशः पार्षदैर्वृतः २८
ऊर्द्धं परश्च वैकुंठात्पंचाशत्कोटियोजने ममाश्रमश्च गो
लोके यत्राहं गोपिकापतिः २९ व्रता राध्यो हि द्विभुजः स

ब्र॰
वै॰ ग॰
१७

17

व्रतस्फलदायकः यद्द्रूपं चिंतयेद्यो हि तद्व्रतस्फलदाय
कं ८० व्रते पूर्णे कुरु शिवे शिवे दत्वा च दक्षिणां पुनः स
मुचितं मूल्यं दत्वा नार्थं गृहीष्यसि ८१ विष्णुदेहाय या गा
वो विष्णुदेहस्तथा शिवः द्विजाय दत्वा गोमूल्यं गृहाण
स्वामिनं शुभे ८२ यज्ञपत्नी यथा दातुं न क्षमः स्वामी स देव
हि तथा सा स्वामिनं दातुमीश्वरी तिष्ठते मतं ८३ इत्युक्त्वा
सा सभामध्ये तत्रैवांतरधीयत हृष्टा सा च सेहृष्टा दक्षि
णां दातुमुद्यता ८४ कृत्वा शिवा पूर्णहोमं सा शिवदक्षिणां
ददौ स्वर्णसंख्याचजग्राह कुमारो देवसंसदि ८५ उवाच
दुर्गां सत्रस्ता शुष्ककंठोष्ठतालुका पुटांजलियुता विप्र
हृदयेन विदूयता ८६ पार्वत्युवाच गोमूल्यं समर्पितं स
मम्यक्ति वेदनिरूपिते गांबालं तं प्रयच्छामि देहि मत्स्वा
मिने द्विजः ८७ तदा दास्यामि विप्रेभ्यो दानानि विविधा
नि च आत्महीनो हि देहः के किं कर्म कर्तुमीश्वरः ८८ सन
त्कुमार उवाच गावो लक्षेण मे देवि विप्रस्य किं प्रयोज
नं दद्यां समूल्यं रत्नं च गावो मूल्यपणेन कः ८९ स्वस्य स्व
स्य स्वयं कर्ता सर्वः सर्वे जगत्त्रये कर्तुरेवेप्सितं कर्म भवे
त् किं वा परेच्छया ९० दिगंबरः प्रभुः कृत्वा भ्रमिष्यामि जग
त्त्रये बालकानां बालिकानां संमोहं स्मितकारणं ९१
इत्युक्त्वा ब्राह्मणः पुत्रो गृहीत्वा शंकरं सुते ॥

सेविधौवासयामासतेजस्वीदेवसंसदि ९२ दृष्ट्वाशिवे
गच्छमाणांकुवेरेणचपार्वती समुपनातंतुत्यक्तंशुष्क
केहेमहृतालका ९३ विचिंत्यमनसासाधीत्येवमेवतुर
त्ययं नहृष्टोभीष्टदेवश्चनचप्राप्तंफलंव्रते ९४ एतस्मि
न्नंतरेदेवाःपार्वतीसहितास्तदा सर्वोदृश्यराकाशेस
मूर्हेतेजसांपरं ९५ कोटिसूर्यप्रभोद्दीप्तिःप्रज्वलंश्चदि
शोदश कैलासशैलेपुरतःसर्वदेवादिभिर्युते ९६ स
र्वोपूर्वेतत्कृत्स्नेविस्तीर्णेमंडलाकृति दृष्ट्वातंचभगव
तस्तुष्टुवुस्तेक्रमेणच ९७ विष्णुरुवाच ब्रह्मांडानिच
सर्वाणियल्लोमविवरेषुच सोयंतेषोडशांशश्चकेवलं
योमहान्विराट् ९८ ब्रह्मोवाच वेदोपयुक्तंरूपंयस्य
त्वसंद्रष्टुमीश्वर सोवेतस्याग्नितमहेशानःकिंसोमित
त्परं ९९ महादेवउवाच ज्ञानाधिष्ठात्रदेवोहंसोमित्तात
परंचकिं सर्वानिर्वचनीयंयत्तेनोस्वेच्छामयंविभुं १००
धर्मउवाच श्रद्दरूपम ~ तेरुद्रयद्रूपंसर्वजंतुभिः किंसो
मितेजोरूपंतेभक्तानुग्रहविग्रहं १ देवाऊचुः केवयं
त्वत्कलांशाश्च किंवात्वंसोमितमीश्वराः सोतेनशक्तावे
दायेनशक्ताचसरस्वती २ मुनयऊचुः वेदान्पठित्वावि
द्वांसोवयंस्तोवेदकारणं सोतमीशानवाणीशत्वांचवा
ङ्मनसोःपरं ३ सरस्वत्युवाच वागधिष्ठात्रदेवीसोव

ब्र॰
वै॰ ग॰
२८

18

दवादिनः किंविज्ञशक्ताः स्वां स्तोतुमहो वाङ्मनसोः परं
४ सावित्र्युवाच वेदप्रसूरहं नाथ स्रष्टा त्वत्कलया पुरा
किं स्तौमि किं स्वभावेन सर्वकारणकारणं ५ लक्ष्मीरु
वाच त्वदंशा विश्वकोताहं जगत्पोषणकारिणी किं स्तौ
मि त्वत्कला स्रष्टा जगतां बीजकारणं ६ हिमालय उवाच
शेसेति संतो मानाथ कर्मणा स्थावरं परं स्तोतुं समर्थयतो
स्म्यप किं स्तौमि स्तोतुमक्षमः ७ क्रमेण सर्वे तस्त्वां दे
वा विरसन्ते वेदाश्च मुनयः सर्वे पार्वती स्तोतुमुद्यताः
८ यो तवक्षजटाभारविभ्रन्तो सवृतात्रते प्रेरिता परमा
त्मानेवतारा ध्येशिवेन च ९ ज्वलदग्निशिखारूपा तेजो
मूर्तिमती सती तपसां फलदा माता जगतां सर्वकर्म
णां १० पार्वत्युवाच कः स्तजानासि मां भद्रनाहं त्वां ज्ञात
मीश्वरी केवा जानन्ति वेदा वा वेदवादे व कारकाः ११ त्व
द्देशा न जानन्ति कथं ज्ञास्यन्ति त्वत्कलाः ते चापि त्वां न जा
नन्ति के वान्ये ज्ञातुमीश्वराः १२ सूक्ष्मात्सूक्ष्मतमो व्यक्तः
स्थूलात्स्थूलतमो महान् विश्वं त्वं विश्वरूपस्त्वं विश्वबीजं
सनातनः १३ कार्यं त्वं कारणं त्वं च कारणानां च कारणं १
तेजः स्वरूपो भगवान्निराकारो निराश्रयः १४ निर्लिप्तो
निर्गुणः साक्षी स्वात्मारामः परात्परः प्रकृतीशो विराट्
बीजं विराड्रूपस्त्वमेव च १५ सगुणस्त्वं प्राकृतिकः कल

याःसृष्टिहेतवे प्रकृतिस्त्वं पुमांस्त्वं च त्वदंसन्नका विद्भवे
ते जीवस्त्वं साक्षिणो भोगी स्वात्मनः प्रतिबिंबकः कर्म
त्वं कर्मबीजं त्वं कर्मणां फलदायकः १७ ध्यायंति योगि
नस्तेजः स्वरूपमशरीरिणं वैष्णवास्त्वं च साकारं कम
नीयं मनोहरं १८ केचिच्चतुर्भुजं शांतं लक्ष्मीकांतं मनो
हरं शंखचक्रगदापद्मधरं पीतांबरं परं १९ द्विभुजं
लोकनाथं च किशोरं श्याममंदरं शांतं गोपांगनाकां
तं रत्नभूषणभूषितं २० एवं तेजस्विनं भक्ताः सेवंते
सततं मुदा ध्यायंते योगिनो यत्र क्व तत्तेजस्विनं वि
ना २१ त्वत्तेजो विभ्रंतां देवदेवानां तेजसा पुरा आवि
र्भूता सहस्राणां च वधाय ब्रह्मणस्तुता २२ नित्या तेजः
स्वरूपाहं विधृत्य विग्रहं विभो स्त्रीरूपं कमनीयं त
द्विधाप समुपस्थिता २३ मायया तव मायाहं मोह.
यित्वा सुरासुरा निहत्य सर्वाञ्छैलेंद्रे भगवंते हिमा
लयं २४ ततोहं संस्तुता देवैस्तारकाख्येण पीडितैः
अभवं दक्षजाया यां शिवस्त्री पूर्वजन्मनि २५ सत्कादे
हे दक्षयज्ञे शिवाहं शिवनिंदया अभवं शैलजायायां शै
लजा च स्वकर्मणा अनेकतपसा प्राप्तः शिवश्चात्रापि ज
न्मनि पाणिं जग्राह मे देवो प्रार्थितो ब्रह्मणा विभुः २६
शृंगारजं च तत्तेजो नालभं देवमायया लोमिता मे च देवेश

ब्र.
वै. ग.
२९

19

पुत्रदुःखेनदुःखिता १८ व्रतेभवद्धियंपुत्रेलब्धुमिच्छा
मिसंप्रते दैवेशविहितावेदसांगेस्वयंस्वामिदक्षिणा
श्रुत्वासर्वेहयास्सिद्धीहयोमाकर्तुंमर्हसि इत्युक्त्वापा
र्वतीतत्रविररामचनारद २० भारतेपार्वतीस्तोत्रंयः
शृणोतिसंयतः सत्पुत्रंलभतेनूनंविख्यातम्प
राक्रमं २१ संवत्सरंहविष्याशीहरिमभ्यर्च्यभक्तितः
सपुण्यकव्रतफलंलभतेनात्रसंशयः २२ कृष्णस्तो
त्रमिदंब्रह्मन्सर्वसंपद्विवर्द्धनं सुखदंमोक्षदंसारं
स्वामिसौभाग्यवर्द्धनं २३ सर्वसौंदर्यबीजंचयशोरा
पत्यविवर्द्धनं हरिभक्तिप्रदंतत्त्वज्ञानबुद्धिवि
वर्द्धनं २४ इतिश्रीब्रह्मवैवर्तेपुण्यकेपार्वतीश्री
कृष्णस्तोत्रंनामसप्तमोध्यायः ७ नारायणउवाच
पार्वतीस्तवनंश्रुत्वाश्रीकृष्णःकरुणानिधिः स्वरू
पंदर्शयामाससर्वादृश्यंमंडलेभे १ सातद्देवीध्या
नलग्नाक्लिष्टकरातमानसा ददर्शतेजसांमध्येरूपं
संसारमोहनं २ सद्रत्नसारनिर्माणेहीरकेणपरि
ष्कृते युक्तेमाणिक्यमालाभीरत्नभूषणमनोहरे वह्नि
संशुद्धपीतांशुधरंवंशीकरेपरं वनमालागलेश्या
मंरत्नभूषणभूषितं ४ किशोरवयसंवेषंविचित्रं
वेदनोदितं तारकस्मितास्यमाद्यंतत्शारदेंदुविनिंदकं

२९

५ मालतीमाल्यसंयुक्तं मयूरपिच्छचूडकं गोपांगना
परिवृतं गायावतस्थलोज्वलं ६ कोटिकंदर्पलावण्य
लीलाधाममनोहरं व्रतीवल्लिष्टं सर्वेष्टं भक्तानुग्रहका
तरं ७ दृष्ट्वा रूपं रूपवती पुत्रं तदनुरूपकं मनसा
वरयामास वरं संप्राप्य तत्क्षणं ८ वरं दत्वा वरेशा सं
ययन्मनसि वांछिते दत्वाभीष्टं सुरेभ्यश्च ततेंतोंतर
धीयत ९ कुमारं वाचयित्वा तद्देवा देवी द्विजैर्दिव
रं दृष्ट्वा निरूपमं तत्र प्रहृष्टा येद यान्विता: १० ब्राह्मणे
भ्यो ददौ तुष्टा रत्नानि विविधानि च सुवर्णानि च भिक्षु
भ्यो भिक्षुवंदिता ११ ब्राह्मणान्भोजयामास देवी सुप
र्वैतां तथा शंकरं पूजयामास चोपहारै स्तु तन्मैः १२
दुंदुभिं वादयामास कारयामास मंगलं सुगीतं गा
पयामास हरिसेवापि संहरं १३ व्रतं समाप्य सा दुर्गा
दत्वा दानानि सस्मिता सर्वांश्च भोजयित्वा तु बुभुजे स्वा
मिना सह १४ तांबूलं च वरं रम्यं कर्पूरादि सुवासितं
क्रमात्स्वदापसर्वेभ्यः तु भुजे तेन कौतुकात् १५ पयःफे
ननिभां शय्यां रम्यां सद्रत्ननिर्मितां पुष्पचंदनसंयुक्तां
कस्तूरीकुंकुमान्वितां १६ रहसि स्वामिना सार्द्धं सुष्वा
प परमेश्वरी कैलासस्यैकदेशे च रम्ये चंदनकानने १७
सुगंधि कुसुमासक्तेन वायुना सुरभीकृते भ्रमरध्वनि

बृ॰
वै॰ ग॰
२॰

२०

संघुक्तेयुस्कोकिलकूजनसुते १८ विजहारसमरसिकांत
त्रेतेनसदाशिवका रेतःपतनकालेचसविस्मविस्मया
यम्भ १९ विधायविप्ररूपंतदाजगामसहरेगटंहं हस्त
गात्रैर्विनातैलैकैर्वलेभितकेसुते २० प्रतीवस्तुक्षुद
शांतेनस्वयापरिपीडिते प्रतीवबदृगात्रैचविप्रनि
लकसुज्वले २१ कटुकाक्रस्वरंदीनंदैन्यातक्रस्मित
मूर्तिमत् आजगामहादेवंरत्नमोशरणागते २२ स
मयात्रैव्यातीनेवपारणाकोलिलोत्वया किंकरोषिम
हादेवहेतानककृणानिये २३ पश्याहंईजराग्रस्तेत्स्व
यापरिपीडिते मातरुतिष्ठमामत्रपच्छुवासितजले

त्रो

२४ अनेतरद्भिवजेरत्नमोशरणागते मातमातंजेग
म्मातरोदनाहंजगाहहिः २५ आजगामवतिहारंपार्व
त्यासहशंकरः ददर्शब्राह्मणंदीनंजरयापरिपीडितं
२६ हडेलललितगात्रैचविभ्रतंदंडमानतं तपस्विन
मशांतंचश्रुश्रुकेष्टतालके २७ कुर्वतंपरयाभक्त्या
प्रणामंतवनंतयोः सुमातकचनेत्रउनीलकंठःस्व
योपमे २८ उवाचपरयाप्रीत्यासुमनसंप्रहस्यचशं
करउवाच गटंहंतेकुत्रविप्रर्षेवदवेदविदांवर किं
नामभवतःविप्रज्ञातमिच्छामिसांप्रतं २९ पार्वत्यु
वाच आगतोसिकुतोविप्रममभाग्याडुपस्थितः ३०

प्रथमेष फलं जन्मब्राह्मणो मङ्गृहोतिथिः १० अतिथिः
पूजितो येन स्वात्मशक्त्या यथोचितं महादानानि सर्वा
णि दत्तानि तेन भूतले ११ अतिथिः पूजितो येन भारते
भक्तिपूर्वकं नानाप्रकारपुष्पाणि वेदोक्तानि च यानि
च १२ तान्येवातिथिसेवायाः कलां नार्हन्ति षोडशीं अ
पूजितोतिथिर्यस्य भवनाद्धि निवर्तते १३ पत्रदेवा अ
यः पश्चाद्गुरवो यान्ति पूजिताः यानि यानि च पापानि ब्र
ह्महत्याकृतानि च १४ तानि सर्वाणि लभते नाभ्यर्च्या
तिथिमीप्सिते ब्राह्मण उवाच ज्ञातासि वेदान्वेदस्त्वे वे
दोक्तं कुरु पूजनं १५ त्वरदर्भोपीडितो मातर्वचनं वच्मि
नोद्भुतं व्याधियुक्तो निराहारो यदा वानशनव्रतः १६
मनोरथेनोपहारं भोक्तुमिच्छति मानवः पार्वत्युवाच
भोक्तुमिच्छसि किं विप्र त्रैलोक्ये यत्सुदुर्लभं १७ भोक्तु
मिच्छसि मत्तात मज्जन्मसफलं कुरु ब्राह्मण उवाच
व्रतेषु च त्वया सर्वमुपहारं समाहृतं १८ नानाविधं मि
ष्टमन्नं भोक्तुं वृद्धः समागतः स्वयत्नेन त्वं पुत्रोऽहमग्रे मा
पूजयिष्यसि १९ दत्तामिष्टानि वस्तूनि त्रैलोक्ये दुर्ल
भानि च तातः पंचविधाः प्रोक्ता मातरो विविधाः स्मृताः
२० पुत्रः पंचविधः साधिकथितो वेदवादिभिः विद्यादाता
न्नदाता च भयत्राता च जन्मदः २१ कन्यादाता च वेदोक्तो

ब्र·
वै·ग·
२१

21

नराणां पितरः स्मृताः ४१ शिष्यस्य पुत्रस्य पौत्रस्य
शरणागतः धर्मपुत्रश्च वक्तारो दायतो धनभागि-
नः ४२ गुरुपत्नी गर्भधात्री स्तनदात्री पितुः स्वसा स्व-
सा मातुः सपत्नी च पुत्रभार्यान्नदायिका ४३ त्वत्तृष्णा-
पीडितो मातर्हुंड्रोहं शरणागतः सोऽधुना भोक्तुमिच्छा-
मि श्रनाथः पूज्यपर्वव ४४ पिष्टकं परमान्नं च स्वपक्वा-
नि फलानि च नानाविधानि मिष्टानि कालदेशोद्भवा-
नि च ४५ पक्वान्नं स्वस्तिकं क्षीरं मिलमिलं विकारकं च
तेद यि वशाकं च वृतपक्वं च व्यञ्जनं ४६ लड्डुकानि ति-
लानां च मिष्टानि सगुडानि च शर्कराणि वस्तूनि
धान्यानि सर्वाणि ४७ ताम्बूलं च वरं रम्यं कर्पूरादि सु-
वासितं जलं सुनिर्मलं स्वादु द्रव्यांतरसुवासितं ४८
द्रव्याणि यानि भुक्तानि मेघा कले वीदरं भवेत् अनंतर-
न्तो द्रवजेतानि मेध्यप्रदास्यसि ४९ त्वां मातस्त्रिजगत्क-
र्त्री सदाता सर्वसंपदो महालक्ष्मीस्वरूपा त्वं मंगलस्य
दायिनी ५० रत्नसिंहासनं वस्त्रं महामूल्यं रत्नभूषणं
वह्निशुद्धांशुकं चारु प्रदास्यसि सुदुर्लभं ५१ सुदुर्लभं
हरेर्मंत्रं हरौ मतिर्ददासि सति हरिप्रिया हरेः शक्ति-
स्त्वमेव सर्वदा सदा ५२ ज्ञानं सदंजयं नाम सदा स्वश-
क्तिं स्वाव प्रदा सर्वा सिद्धिं च किं मातर्देयं स्वसनाय च ५३

मनः सुनिर्मलं कृत्वा धर्मं तपसि संतते करिष्यसि
सर्वपरेण कामेन सर्वहेतुके ५४ स्वकामात्कृतेक
र्मकर्मणा भोगापवर्ग च भोगी सुभासुभौ ज्ञेयौ तौ हेतू
सुखदुःखयोः ५५ दुःखेन कस्माद्भवति सुखं वा जग
देविके सर्वः स्वकर्मणा भोगः तेन न तद्धिरनो बुधः ५६ कर्म
निर्मूलयेत्सैव संतो हि सततं सदा हरिभावनयुज्ञात
तपसा भक्तसंगतः ५७ इंद्रियद्वयसंयोगसुखं विषयि च
सतावधि हरिसंलापरूपं च सुखं तत्सर्वकालिकं ५८
हरिस्मरणशालीनां नाशुपीति सतां सता न तेषामी
श्वरः कालो न च मृत्युजयो ध्रुवं ५९ शिवे जीवंति ये भक्ता
भारते चिरजीविनः सर्वसिद्धिं च विज्ञाय स्वच्छंदं सर्वगा
मिनः ६० जातिस्मरा हरेर्भक्ता जानंति कोटिजन्मनः
कथयंति कथां जन्म लभंते स्वेच्छया सदा ६१ परं पुनं
ति ते पूता तीर्थानि स्वावलीलया पुण्यक्षेत्रेषु सेवार्थे
परार्थं च भ्रमंतिते ६२ वैष्णवानां पदस्पर्शा सद्यः पूता व
सुंधरा तद्देहोदाहनमात्रे च तीर्थं यत्र वसंतिते ६३ गुरो
र्गस्मात् हरिमंत्रं श्रुतो यस्य प्रविशपति तं वै सर्वती
र्थपूतं प्रवदंति पुराविदः ६४ पुरुषाणां शतं पूर्वं तेषु
द्धरंति शतं परं लीलया भारते भक्ता मोदंतान्मातरंत
था ६५ मातामहानां पुरुषात् दशपूर्वा परान्दश मातः

प्रभुस्त्वद्धरेत्तिदा रुणाद्यमतादनात् ६६ भक्तदर्शन
मात्रेण हेमानवा मामुवंतिये नेष्णाताः सर्वतीर्थेषु स
र्वयज्ञेषु दीक्षिताः ६७ न लिप्ताः पातकैर्भक्ताः सततं ह
रिमानसाः यथाग्नयः सर्वभक्षा यथा द्रव्येषु वायवः
६८ त्रिकोटिजन्मनाजेन प्राप्नोति जन्ममानवं प्राप्नोति
भक्तसंगं समानुष्ये कोटिजन्मसु ६९ भक्तसंगा भवेद्ग
ङ्गे रंकुरो जीवितः सति प्रभक्तादर्शनादेव सव प्राप्नोति
सुकृती ७० पुनः प्रफुल्लतां याति वैष्णवालापमात्रतः
सेकुरस्या विनाशी चेत्त्वद्देशे प्रविजन्मनि ७१ तस्य वर्द्ध
मानस्य हरिवृक्षस्य फलं सति परिणामे भक्तिपाके पार्षद
त्वं भवेद्धरे ७२ महति प्रलये नाशो न भवेत्तस्य निश्चितं
सर्वेभ्यश्चैव संहारे ब्रह्मलोकस्य ब्रह्मणः ७३ तस्मान्ना
रायणे भक्तिं देहि नारायणाविके न भवेद्धि स्वसुख्यस्य
विष्णुमायेत्वयाविना ७४ न डते लोकमिच्छार्थे त्वज्जपस्त
८ उभयोः सैनयोर्युद्धंवभूवतत्रनारद पलायिनोरा
मशिष्याश्चातरस्यमहावलाः ९ ततविततसर्वांगाः
कार्तवीर्यप्रपीडिताः स्वपस्पशरजालेनरामःशस्त्रभृ
तांवरः १० तदृदर्शस्वसैन्यंचराजमन्यस्वमेवच वित
पवह्निरामस्यवभूवाग्निमयोरणे ११ निर्वापयामाससरा
जावारुणेनविचक्षणः चिक्षेपरामोगांधर्वंशैलसर्प
समन्वितं १२ वायव्येनमहाराजः प्रेरयामासलीलया
माहेश्वरंचभगवांश्चिक्षेपभृगुनंदनः १३ निर्वापयामा
सराजावैस्वबाणेनलीलया चिक्षेपरामोनागास्त्रंदु
र्निवार्यंभयंकरं १४ गारुडेनमहाराजः प्रेरयामासली
लया भृगुश्चिक्षेपब्रह्मास्त्रंपनाशायनारद १५ ब्रह्मा
स्त्रेणचभूपस्यप्राणनिर्वापणंमुने दत्तदत्तेवयच्छूलम
व्यर्थमंत्रपूर्वकं १६ जग्राहराजासमरेपर्शुरामव
धायच शूलंददर्शरामस्यशतसूर्यसमप्रभं १७
प्रलयाग्निशिखोद्रिक्तंदुर्निवार्यंसुरैरपि ।

पपातशूलंसमरेरामस्योपरिनारद १८ मूर्छामवा
पसभ्रगुःपपातवक्त्रहरिंस्मरन् पतितेपर्शुरामेचस
र्वेदेवाभयाकुलाः १९ आजग्मुःसमरंतत्रब्रह्मविष्णुम
हेश्वराः शंकरस्यमहाज्ञातामहाज्ञानेनलीलया २०
बालकंजीवयामासतूर्णंनारायणाज्ञया सुस्थचेत
नोप्राप्यददर्शपुरतःस्मरान् २१ ब्रह्मणोनामपरंभक्त्याल
ज्ञानत्रात्मकेश्वरः ब्रह्मण्यशिरसाशीघ्रंतुष्टावपरमे
श्वरान् २२ तत्राजगामभगवान्दत्तविद्योरणस्थले शि
ष्यरक्षानिमित्तेनकृपालुर्भक्तवत्सलः २३ भृगुःपाशु
पतास्त्रंचजग्राहकोपसंयुतः दत्तदत्तेनदृष्टेनवभूव
स्तम्भितोरणे २४ ददर्शस्तम्भितोरामोराजानंरणमूर्द्ध
नि नानापार्षदयुक्तेनकृष्णेनरक्षितंरणे २५ सददर्श
नेप्रज्वलन्तंभूषणाद्यैर्वेतांसदा सस्मितेनस्तुतेनैवब्र
ह्मविष्णुमहेश्वरः २६ गोपालशतयुक्तेनगोपवेशावि
धायिना नवीननीरदाभेनवंशीहस्तेननारद २७ एत
स्मिन्नन्तरेतत्रवाग्बभूवाशरीरिणी दत्तेनदत्तंकवचं
कृष्णस्यपरमात्मनः २८ गलात्स्थितंतेणिवास्मैसद्रत्न
गुटिकाचिते गृहीतेकवचेशम्भोभिक्षयायोगिनागुरौ
२९ तदाहन्तुंनृपंशक्तोभृगुश्चेतिचनारद शम्भुनाभृ
गवेदत्तेकृष्णस्यकवचेचयते ३० कृष्णापारिषिणीवा

त्रे.
वै. ग.
८१
९७

णीशंकरोद्विजरूपधृक् भित्वाकृत्वानकवचमानी
यवन्तपस्यच ११ उवाचपर्शुरामस्त्वराजानंसमरंप्रति
पर्शुराम उवाच राजेन्द्रोत्तिष्ठसमरेऽरुसाहसपूर्वकं १२
कालभेदेजयोनृणां कालभेदेपराजयः अधीतंविधि
वद्दत्तंकृत्स्नापृथ्वीवशासिता १३ यशःकृतंचसंग्राम
त्वयाहंमूर्छितोधुना जिताःसर्वेपराजेन्द्रालीलयारा
वणोजितः १४ जितोहंदत्तशूलेनशंभुनाजीवितःपुनः
रामस्यवचनंश्रुत्वाराजापरमधार्मिकः १५ मूर्ध्नाप्रणम्य
तंभक्त्यायथोचितमुवाचह राजोवाच किमधीतंचकिं
दत्तंकावापृथ्वीप्रशासिता १६ गताःकतिविधाभूपा
मादृशाधरणीतले बुद्धिस्तेजोविक्रमश्च विविधारण
मेत्रणा १७ सर्वैश्वर्यंतथाज्ञानंदानंशक्तिश्चलौकिकी
श्चाचारोविनयोविद्याप्रतिष्ठापरमंतपः १८ सर्वंमनोर
मावज्ञेगतमेवममप्रभो सावनायाणतस्यामसाधी
पंकाशसंभवा १९ येऽन्येचपत्नीमाताचसैत्स्फीडनसं
गिनी भ्रावाक्यात्संगिनीशम्बह्वयनेभोजनेरणे २० ता
विनाप्राणहीनोहंविषहीनोयथोरगः तयानष्टंहंमेयु
ङ्पुरंयशोवनाश्रिता २१ द्वितीयाशोवनाविप्रहतोहं
भ्रात्मणेनच कालेसिंहःश्रृगालेचश्रृगालःसिंहमेवच
२२ कालेव्याघ्रेनरोहंतिराजेन्द्रहरिणास्तथा ५

सृष्टिसंहृतिकाकाले गणरूपं च यथोरगाः ४३ किंकरे
लोतिराजेंद्र करस्यास्मगणराचराः ४४ सर्वकालेलये
यातिकालोहि दुरतिक्रमः कालस्यकालः श्रीकृष्णः
स्रष्टायेयेच्छया ४६ संहर्ताचैवसंहर्तः पातःपाताप
ग्रसहृ महास्थूलात्स्थूलतमः सूक्ष्मात्सूक्ष्मतमः कृशः
गुणाणःपरमः कालकालस्य कालभेदकः यस्यलोमानि
विश्वानि सद्गुणांशमहाविराट् ४८ तेजसाषोडशांशश्च
कृष्णस्यपरमात्मनः ततः क्षुद्रविराट्जातः सर्वेषांका
रणेपरं ४९ यःस्रष्टाचस्वयंब्रह्मा पद्मनाभिकमलोद्भवः
नाभेःकमलदंडस्पर्शोतेनप्राप्यपत्नतः ५० ब्रह्मध्याने
लक्षवर्षंततःस्वस्थानसंस्थितः नयनश्चकेततःस्म
लक्षवर्षंचवायुभक्ष ५१ ततोददर्शगोलोकेश्रीकृष्णे
चसपार्षदे गोपगोपीपरिवृतेद्विभुजेमुरलीकरे ५२
रत्नसिंहासनस्थेचराधावक्षःस्थलस्थिते दृष्ट्वातुतोट
हीत्वावप्रणम्यचपुनःपुनः ५३ ईश्वरेच्छाक्रीडनकात्र
त्रिविक्रमहेश्वराः ५४ संतिविश्वेषु सर्वेषुश्रीकृष्णस्य
कृष्णलोद्भवाः तेचदेवाःप्राकृतिकाःप्राकृतस्यमहाविरा
ट् सर्वप्रसूताप्रकृतिःश्रीकृष्णःप्रकृतेःपरः नशक्तः
स्वयमीशोपितांशक्तिंप्रकृतिंविना ५५ सृष्टिंविधातुमा
येशोनसृष्टिर्मायया विना मायाकृष्णेतिरोभूतासृष्टिसंहा

ब्र.
वै. ग.
८८

रकारके साविर्भूता सृष्टिकाले सा च नित्या यथेश्वरः
कुलालश्च घटं कर्तुं यथा शक्तो मृदं विना ५९ स्वर्णं वि
ना स्वर्णकारः कुंडलं कर्तुमक्षमः सा सृष्टिकाले शक्ति
श्च पंचधा चेश्वरेच्छया ६० राधा पद्मा च सावित्री दुर्गा देवी
सरस्वती प्राणाधिष्ठात्री या देवी कृष्णस्य परमात्मनः ६१
प्राणाधिकप्रियतमा सा राधा परिकीर्तिता ऐश्वर्याधि
ष्ठातृदेवी या सर्वमंगलकारिणी ६२ परमानंदरू
पा च सा लक्ष्मीः परिकीर्तिता विद्याधिष्ठातृदेवी या पर
मेशस्य दुर्लभा ६३ वेदषा स्ववेदमाता सा सावित्री परिकी
र्तिता बुद्ध्यधिष्ठातृदेवी या सर्वशक्तिस्वरूपिणी ६४
सर्वज्ञानात्मिका सर्वा सर्वदुर्गतिनाशिनी वागधिष्ठातृ
देवी या शास्त्रज्ञानप्रदा सदा ६५ कृष्णकंठोद्भवा या च सा
हि देवी सरस्वती पंचधा दास्वयं देवी मूलप्रकृतिरीश्व
री ६६ ततः सृष्टिक्रमेणैव बहुधा कलया च सा योषि
तः प्रकृतेरंशाः कृष्णस्य च ६७ मायया सृष्टिकाले च तद्वि
ना न भवोद्भवाः सृष्टिश्च प्रति विश्वं च ब्रह्मन् ब्रह्मोद्भवा सदा
६८ मातापि लक्ष्म्या सहितो शिवः शश्वच्छिवप्रदः हन्त द
मेज्ञानमिदं राम सर्वं च पुष्करे दत्ता कालेन मां ध्यावबु
निप्रवर सन्निधौ इत्युक्त्वा कार्तवीर्यश्च रामेन ताव स
स्मितं ७० प्रकृतो हरवंशी शीघ्रं रहो नाम सशेरयत्नः

रामस्तेनो राजसैन्यं ब्रह्मास्त्रेण जघान च ७१ स्वयं पाशुप
तेनैव लीलया च हरिं स्मरन् पवैत्रिःसमहृतस्य क्रमे
णैव च स्मेयरो ७२ रामश्चकार निर्भूपां लीलया च शिवं
स्मरन् गर्भस्थमात्रक्रोडस्थं शिशुं हंडवन्नृपम् ७३ ज
घान क्षत्रियान्रामः प्रतिज्ञापालनाय च कार्तवीर्यस्य गो
लोके जगाम कृत्स्नस्य समत्रिविर्षि ७४ जगाम परशुरामस्य बाल
ये श्रीहरिं स्मरन् त्रिःसप्तकृत्वा निर्भूयां महीं दत्त्वा महे
श्वरः ७५ परशुना स्वमणा दत्त्वा परशुरामं च कारह देवाश्च
मुनयो देवाः सिद्धगंधर्वकिन्नराः ७६ सर्वे च ब्रह्मपुष्पवृ
ष्टिं रामस्य मूर्ध्नि नारद सर्वे दुन्दुभयो नेदुर्हरिशंखाश्च
वहू ७७ परशुरामस्य यशसां शुभेन पूरितं जगत् ब्रह्मा
ण्डं ब्रह्मशक्रस्वच्छं च नेवालि किल्मषा ७८ जमदग्निश्च
लोकाद्राजगाम प्रहर्षितः पुलकांकितसर्वांगः सा
नंदाश्रुसमन्विताः ७९ दूर्वापुष्पकराः सर्वे कुर्वन्तो
मंगलाशिषं प्रणनाम च तातं रामो दंडवत्पतितो भुवि
८० क्रोडे चकार ब्रह्मादिकं मातात निदं ददन् नमश्चा
वरवयं ब्रह्मा परशुरामं जगद्गुरुः ८१ हितं मितं वेदसा
रं परिणामसुखावहं श्रीब्रह्मोवाच शृणु राम प्रवक्ष्या
मि सर्वसंपत्करं परं कारावशाविकवचनं समस्तं च स
वैसंमतं ज्ञानानामेव सर्वेषां मिष्टः ज्ञप्तमः परः ८२

ब्र॰
वै॰ग॰
८५

८९

जनकोजन्मदातृत्वात्पालनाच्च पिता स्मृतः गरीयान्
जन्मदातुश्च योन्नदाता पिता मुने ८४ विद्याज्ञानस्वरोदे
ह्यांतनित्यपितरुद्भवः तेयाः शतगुणामाता पूज्या मा
न्या च वंदिता गर्भधारणपोषाभ्यां सा च ताभ्यां गरीयसी
तेभ्यः शतगुणः पूज्यो भीष्टदेवः श्रुतौ श्रुतः ८६ ज्ञानवि
द्यामंत्रदाता भीष्टदेवात्परो गुरुः गुरुवक्त्रगुरुपुत्रश्च गुरु
पत्नी ततोधिका ८७ देवरुष्टे गुरुस्त्राता गुरो रुष्टे न कश्च
न गुरुर्ब्रह्मा गुरुर्विष्णु गुरुर्देवो महेश्वरः ८८ गुरुरेव
परंब्रह्म ब्रह्माणो भ्यः प्रियः परः गुरुर्ज्ञानं ददात्येव ज्ञान
च हरिभक्तिदे ८९ हरिभक्तिप्रदाता यः सेवं वंधुस्ततो
धिकं अज्ञानध्वांतनाशश्च ज्ञानदीपप्रतो लभेत ९०
ब्धाच निर्मलेपश्येत्को वा वंधुस्ततो परः गुरुदत्तेच
मंत्रा च जप्याभंत्रतो लभेत ९१ सर्वज्ञत्वंच सिद्धिंच को
वा वंधुस्ततोधिकः सर्वविजयतिसर्वत्रविद्यया गुरुदत्त
या ९२ मयापूज्योपि जगति को वा वंधुस्ततोधिकः वि
द्याधोवाय नो योवा याम्पूतोनभजेद्गुरुं ९३ ब्रह्महत्या
दिकं पापं लभते नात्र संशयः दरिद्रपतितत्तद्दनेर श्र
ष्टाचेरद्गुरुं ९४ सोपि विस्तीर्णस्तानोपिनाधिकारीच
कर्मसु अभीष्टदेवः श्रीकृष्णो गुरुस्तेषां करः स्वयं
९५ शरणं गच्छेद्देवात्पूज्यतमो गुरुः ॥

त्रिःसप्तकृत्वो निर्भूपालया पृथ्वी यतः कृता ९६ प्रणाय
तो हरेर्भक्तिस्ते शिवे शरणं व्रज शिवे त्वं शिवरूपे त्वं शि
वदे शिवकारणे ९७ शिवाराध्यं शिवे संतं गुरुं त्वे शर
णं व्रज आत्मा कृष्णः शिवो ज्ञाने मनो हंसर्वजीविष्णु ९८
प्राणाविसोस्य प्रकृतिः सर्वशक्तियुताम्बत ज्ञानदे ज्ञान
रूपं च ज्ञानवीजे सनातने ९९ स्कंदजं च कालकालं ते
गुरुं शरणं व्रज ब्रह्मयोनिस्वरूपं ते भक्तानुग्रहविग्र
हे १०० शरणं व्रज सर्वज्ञं भगवंतं सनातनं प्रकृतिर्ले
त्वं सर्वं च न पस्तमायमीश्वरं १ कांतं प्रियपतिं लभेतं गु
रुं शरणं व्रज इत्युक्त्वा मुनिभिः सार्द्धं जगाम कमलोद्भवः
गमस्वर्ग्गं तं कैलासं मनस्यं केचनारद २ इति श्रीब्रह्मवै
वर्त्ते महापुराणे नारायणनारदसंवादे गणपतिखंडे
चत्वारिंशोऽध्यायः ४० श्रीनारायण उवाच हरेस्यकव
चं दत्वा कृत्वा निःक्षत्रियां महीं रामो जगाम कैलासं नं
मस्कर्त्तुं शिवं गुरुं गुरुपत्नीं शिवां मद्धं द्रष्टुं गुरुसुतौ
चैतौ गुणैर्नारायणसमौ कार्त्तिकेयगणेश्वरौ २ मनो
यायी महात्मा च शीघ्रं संप्राप्य तत्क्षणं ददर्श नगरं रम्य
मतीव सुमनोहरं ३ शुद्धस्फटिकसंकाशैर्मणिभिः सु
मनोहरैः सुवर्णमूल्यसदृशैराजमार्गविराजितं ४
सिंहद्वाकारवर्णैश्च वेष्टितं मणिवेदिभिः संयुक्तं सुक

श्री·
ल·वे·
ग·
९·

९०

निलयैः परितो मणिमंडपैः ५ पद्मरागमालयैर्दिव्यैः
....
....

वकोवनकूर्मैश्चपक्षिगणवेष्टिते ७ रत्नभूषणभू
षाढ्यैः प्रेतैः सुंदरीगणैः बालिकाभिर्वीणकैश्चविचित्रपुत
लिकारकैः ८ क्रीडद्भिः सस्मितैः शाश्वतस्वच्छंदैश्चविरा
जितैः पारिजातद्रुमगणैः स्वर्नदीतीरनीरजैः ९ आकी
र्णपुष्पजालैश्चपुष्पितैश्चसगोपिभिः कल्पवृक्षलताश्रितैः
सिद्धैः कामधेनुपुरस्कृतैः १० सिद्धविद्यादिनिपुणैश्च
लपवद्भिर्निषेविते वटवृक्षैरनेकैश्चविलसद्यानेनाच्छदैः
११ शतयोजनविस्तीर्णैः शतस्कंधसमन्वितैः अनेक
शाखानिकेरसस्यफलसंयुतैः १२ नानापक्षिगण
कीर्णैः सुमनोहरशाखितैः कंपितैः शीतवातेन मंडि
तेचसगोपिना १३ पुष्पोद्यानसहस्रेण मरसोवशत
नैव सिद्धज्ञानयलेलैश्चपूतेमणिविकाशजैः १४ रा
मोपिदृष्ट्वानगरमतीवहृष्टमानसः ददर्शपुरतोर
म्यसहस्रेनशोकरालयं १५ सुमनोमाल्यशतकैर्मणिभिः
सुवर्णवर्णकैः विचित्रैरत्नसारेणरचितविश्वकर्म
णा १६ शतयोजनविस्तीर्णत्रिपदयोजनोच्छ्रितं चतु
रश्रं चतुष्कोणमाकारं सुमनोहरं १७ हारस्तकपा

दैननानाविद्यान्वितेनच युक्तंमणीन्द्रवेदीभिर्मणि
स्तंभविराजितं १८ तद्दक्षिणेहर्षदेवंचवामेसिंहंचनार
दं नंदीश्वरंमहाकालंपिंगलाक्षंभयंकरं १९ विशाला
क्षंचबाणंविरूपाक्षंमहाबलं विकटाक्षंभास्कराक्षंर
क्ताक्षंविकटोदरं २० संहारभैरवंकालभैरवंचभयंक
रं रुरुभैरवमीशानंमहाभैरवमेवच २१ कृष्णांगभै
रवंचैवक्रोधभैरवमुल्बणं कपालभैरवंचैवरुद्र
भैरवमेवच २२ सिद्धेन्द्रांश्चरुद्रगणान्विद्याधान्ग्रह
कोत्तमा भूतांश्चतान्पिशाचांश्चकूष्माण्डान्ब्रह्मराक्ष
सान् २३ वेतालान्दानवांश्चैवयोगीन्द्रांश्चजटाधरान्य
ताल्किंपुरुषांश्चैवकिंनरांश्चददर्शह २४ तान्दृष्ट्वान
टिकेशाज्ञांगृहीत्वाभ्यगुनन्दनः तान्सभाग्याभ्यन्तरंच
जगामानंदमानसः २५ रत्नेंद्रसारनिर्माणं ददर्शास
नमंदिरं अमूल्यरत्नकलशोज्ज्वलद्भिश्चविराजितं २६
गोरोचनाभिर्मणिभिःपूतस्तंभसहस्रकैः मणिसारवि
कारैश्चसोपानैःपरिसेवितं २७ ददर्शाभ्यंतरद्वारंनाना
चित्रेणचित्रितं मुक्तामाणिक्यग्रथितैर्मालाजालैर्वि
राजितं २८ ददर्शकार्तिकंवामेदक्षिणेचगणेश्वरं वीर
भद्रंमहाकायंशिवतुल्यपराक्रमं २९ प्रधानपार्षदगा
णांस्तत्रपालांश्चनारद रत्नसिंहासनस्थांश्चरत्नभूषणभू

ब्र·
वै· ग·
९१

91

स्थितान् ९ तान् संभाष्य भृगुः श्रीमान् महाबलपराक्रमः
पर्शुहस्तः प्रभुं रामो गमनं कर्तुमुद्यतः ११ गच्छन्तं तं ग
णेशश्च तं निषिद्ध्यवाच ह निद्रितो निद्रया युक्तो महा
देवो भुनक्ति च १२ ईश्वराज्ञां गृहीत्वाहं समागमत णां
तेरे त्वया सार्द्धं गमिष्यामि भ्रातस्तिष्ठ निःसंप्रदं १३ श्रुत्वा
गणेशवचनं पर्शुरामो महाबलः बृहस्पतिसमो वा
क्यप्रवक्ता समुपचक्रमे १४ इति श्रीब्रह्मवैवर्ते महापु
राणे नारायणनारदसंवादे गणपतिखण्डे कैलास
वर्णनं नाम पञ्चचत्वारिंशोऽध्यायः ४५ श्रीपरशुराम उ
वाच यद्भ्यान्तः पुरस्त्रातः प्रणामं कर्तुमीश्वरं प्रणम्य
मातरं भक्त्या यास्यामि वरितोऽहं १ त्रिः सप्तकृत्वा नि
भूया कृता पृथ्वी च सत्त्वया कार्तवीर्यः सर्वदस्युर्हतो य
स्य प्रसादतः २ नाना विद्या यतो लब्धा नाना शास्त्राणि सद्गुले
भे तं गुरुं जगतां नाथं द्रष्टुमिच्छामि साम्प्रतं ३ सगुणं
निर्गुणं चैव भक्तानुग्रहविग्रहं सत्यं नित्यं स्वरूपं च ब्र
ह्मज्योतिः सनातनं ४ स्वेच्छामयं दयासिन्धुं दीनबन्धुम
नीश्वरं स्वात्मारामं पूर्णकामं व्यक्ताव्यक्तं परात्परं पर
परात्परं स्रष्टारं प्रकृष्टं तं प्रकृष्टं तं पुराणं परमात्मानं
ईशानमादिमव्ययं ५ सर्वमङ्गलमङ्गल्यं सर्वमङ्गल
कारणं सर्वमङ्गलदं शान्तं सर्वैश्वर्यप्रदं परं ६

श्राग्रुतोऽथप्रसन्नास्येशरणागतवत्सले भक्ताभयप्र
देभक्तवत्सलेसमदर्शिने ८ इत्युक्त्वापर्शुरामस्यत
स्थौगणपतेःपुरः वाचामधुरयातत्रतमुवाचगणेश्व
रः ९ गणेशउवाच क्षणंतिष्ठक्षणंतिष्ठस्मरणेश्चान्तरि
देवचः रहस्यस्थलनिद्राक्तश्चनदृष्टःश्रीयुतःपुमान् १०
स्त्रीसंगतेवपुरूपेयःपश्यतिनराधमः करोतिरसभंगं
वाकालसूत्रंव्रजेद्ध्रुवं ११ तत्रतिष्ठतिपापीयान्यावच्च
न्द्रदिवाकरौ विशेषतस्तुपितरंगुरुंवाभूपतिंद्विज १२
रहःस्मरंतिसंयुक्तंनहिपश्येद्विचक्षणः कामतःको
पतोवापियःपश्येत्तंरतोन्मुखं १३ स्त्रीविच्छेदोभवेत्तस्य
स्यंवंसप्तसुजन्मसु श्रोणिवलःस्थलेवक्रेयःपश्यति
परस्त्रियाः १४ कामतोपिविमूढस्यषंढोभवतिनिश्चि
तं गणेशस्यवचःश्रुत्वाप्रहस्यभृगुनंदनः १५ तमुवा
चमहाकोपात्क्लिष्टंवचनेमुने परशुरामउवाच अहो
श्रुतेकिंवचनमपूर्वंनाश्रुतंमं १६ इदमेववनंयेनैव
श्रुतमीश्वरवक्त्रतः श्रुतोश्रुतेवाकामिदंकामिनोव
विकारिणो १७ निर्विकारस्यचशिशोर्नदोषःकश्चि
देवहि यास्याम्यतःपुरंभ्रातस्त्वंकिंतिष्ठकालके १८
यथाहंकरिष्यामिकार्यंचसमयोचिते नचैवमाता
त्तनस्थस्ययामामेनिरूपिते १९ जगतांपितरौतौवपा

ब्र॰
वै॰ ग॰
९२

९२

देवीपरमेश्वरो पार्वतीमीशमानशंभुरितिकेननि
रूपितं २० सर्वरूपः शंकरश्च सर्वरूपा च पार्वती गु
णतः तस्य का क्रीडा तद्भेगो वा कुतो विभो २१ क्रीडाल
ज्जाभीतिभेगो ग्राम्यस्येनेश्वरस्य च स्तनंधं बालके दृष्ट्वा
पित्रो लज्जा कुतो भवेत् २२ लज्जायाश्च कुतो लज्जा सेजेश
स्य च वा कुतः लज्जा लज्जामवाप्नोति तापं किं वा कुतोश
नः २३ शीतं महाविष्णुर्निदाघो दाहमेव च भीतिं भीति
मवाप्नोति मृत्युर्मृत्यो विभेति किं २४ कुतोज्वरो ज्वरं
हेति व्याधिर्व्याधिं वशाश्यति संहर्तारं च संहर्ता पाताल
पतिं तं मतं २५ तत्तत्त्वं समवाप्नोति तस्मात्स्रोतश्रया
ति किं निद्रा निद्रावशश्रीः शोभां शांतिः शांतिवत्समंत २६
तुष्टिः तुष्टिमवाप्नोति तुष्टिस्तुष्टितमा तमो आत्मनः प
रमात्मापि शक्तिः शक्तेर्विभेति किं २७ लोभमोहकाम
क्रोधाः स्वात्मनेव हि वाधिताः कृपानयन्त्रादशवानेक्रा
वेदेच्छया प्रभो अज्ञानतुष्यः को विकारो ज्वरं वा वाधने
ज्वरः चिंतानचिंतया ग्रस्ता च तः स्वं च न पश्यति २८ ह
र्षो मुदं किं प्राप्नोति शोकः शोकेन वाध्यते का विपत्तिर्विप
त्स्वसंपत्तिः संपदः कुतः मायाया धारणाशक्तिः स्मृतेर्वा
स्मरणं कुतः निदाघः स्वप्रतापेन विवस्वानिति संमतः वि
परीता मनोभावा तन्मये वच विभाषुना श्रुतोयगुरुमुखाद्यः

ददर्श स्म श्रुतोऽश्रुतः ३१

इत्युक्त्वा पर्शुरामस्य प्रहस्य च पुनः पुनः शीघ्रं गतं मन
स्यके गुरोरभ्यंतरे मुदा ११ पर्शुरामवचः श्रुत्वा ध्यात
को योगिनां वरः शुद्धसत्वस्वरूपस्य प्रहस्येदमुवाच
ह १४ गणपतिरुवाच अज्ञानतिमिरांधस्य ज्ञाने
प्राप्नोति ज्ञानिनः पितृभ्रातृसुताविता ज्ञानं दुर्लभं भाग्य
वान्लभेत् १५ श्रुतं ज्ञानं विशिष्टं वक्तानि नामपि दुर्ल
भं किं विशेषविभवं बुद्धेः शृणु भ्रातर्निवेदने १६ योनि
र्गुणः सनिर्लेपः शक्तिध्यानं हि संयुतः स्थिरत्वगाश्रितः
शक्तो निर्गुणः सगुणो भवेत् १७ यावंति च शरीराणि
भोगार्हाणि महात्मने प्राकृतानि च सर्वाणि श्रीकृष्ण
विग्रहं विना १८ ध्यायंते योगिनः स्वच्छं ज्योतिः स्व
रूपिणि हस्तपादादिरहितं निर्गुणं प्रकृतेः परं १९
वैष्णवास्तं न मन्यंते तद्भक्ताः सूक्ष्मदर्शिनः कुतो वभू
वततज्ज्योतिरहो तेजस्विनं विना २० ज्योतिरभ्यंतरे नि
त्यं शरीरं श्यामसुंदरं द्विभुजं मुरलीहस्तं सस्मितं पी
तवाससे २१ मतीवामूल्यसद्रत्नभूषणेन विभूषितं
एवं भक्ताश्च ध्यायंते शश्वच्चरणसेविनः २२ योगिनो
योगरूपं च काले भक्तिविपाकतः ज्योतिरभ्यंतरे रू
तिं पश्यंति कृपया विभोः २३ तदा दास्ये नियुक्ताश्च भव
त्येवश्वरेच्छया योगस्तपो वा दास्यस्य कलां नार्हंति षोडशीं

ब्र.
वै. ग.
५२

93

यदास्रष्टुंमनश्चक्रेः कृष्णः सस्रजेप्रकृतिंमुदा तयोर्नावर्ष
पेर्दीर्घवीर्याड्डिंभोभवेन्मने ४५ दिव्यात्तल्लवर्षेणग
र्भोडिंभोविनिर्गतः तदाचकारनिश्वासंततोवायुर्बभू
वह ४६ निश्वासेनसमंध्यानस्वेदबिंदुर्विनिर्गतः ततो
बभूवसहसाजलराशिर्हरेःपुनः ४७ तज्जलेचस्थितो
डिंभोदिव्यंवत्सवर्षकं ततोबभूवसहसाविश्वाधा
रोमहान्विराट् ४८ यावंतिगात्रेलोमानितस्यसंतिम
हात्मनः ब्रह्मांडानिवतावंतिविद्यमानानिनिश्चितं ४९
तेत्रैवप्रतिब्रह्मांडेब्रह्मविष्णुमहेश्वराः देवानराश्च
तथाविद्यमानाश्चराचराः ५० महद्विराजश्रयस्यसर्व
स्यैवजनस्यच निश्वासवायुर्भगवान्बभूवश्रीहरेर्म
ने ५१ महाविष्णुस्वकलयाततःक्षुद्रविराड्भूत् त
न्नाभिकमलेब्रह्माशंकरस्तल्ललाटजः ५२ विष्णुस्वदे
शेधातापःश्वेतद्वीपनिवासकृत् एवंतेप्रतिब्रह्मांडेब्र
ह्मविष्णुमहेश्वराः ५३ स्वयंचस्वांशकलयानानामूर्तिध
रोहरिः यदाभवत्समग्रणःसर्वशक्तियुतस्तदा ५४
कण्ठलज्जादिरहितःसर्वस्वेच्छामयोमहान् सर्वदासर्व
भोगार्हःसर्वशक्तिसमन्वितः ५५ लज्जानास्यवतज्ज्ञा
धाततोयंसर्वसंमतः साचलज्जावतीदेवीतस्यलज्जा
कृतोगता सर्वशक्तिमतीदुर्गाप्रकृतेरंशावशेलज्जा

तस्माल्लज्जादयः संति सर्वे दासर्वसंमताः ५७ पंचधा
सा च प्रकृतिः श्रीकृष्णस्यैव बभूव ह राधापद्मा च सावि
त्री दुर्गा देवी सरस्वती ५८ प्राणाधिष्ठात्री सा देवी कृष्ण
स्य परमात्मनः प्राणाधिका प्रिया सा च राधा कीर्तितस्य च
तस्मि ५९ विद्याधिष्ठात्री या देवी सा वित्री ब्रह्मणः प्रिया
लक्ष्मीर्नारायणस्यैषा सर्वसंपत्स्वरूपिणी ६० सरस्व
ती द्विधा भूता कृष्णस्य मुखनिर्गता भारती ब्रह्मणः कां
ता स्वयं नारायणस्य च ६१ बुद्ध्यधिष्ठात्री या देवी ज्ञानस
शक्तिसंयुता सा दुर्गा शूलिनः कांता तस्माल्लज्जादिको
गता ६२ प्रकृतिः पंचधा ख्यातः गोलोके च बभूव ह इमा
श्च यान्ताः कलया बभूवानेकधापि सा ६३ विप्रेंद्र नित्य
वैकुंठे ब्रह्मांडात्परमुच्यते अविनाशिस्थले शश्वत्
लये प्राकृतिके ध्रुवं ६४ तत्र नारायणो देवः कृष्णां
गो शाश्वत् चतुर्भुजः वनमाली पीतवासाः शंखाचपद्म
या सह ६५ स्वयं कृष्णश्च गोलोके द्विभुजः श्यामसुंद
रः सस्मितो मुरलीहस्तो राधावक्षस्थलस्थितः ६६ स्व
च्छामयः स्वतंत्रश्च परमानंदरूपकः सगुणः कलांश
वा यस्यैवांशांशो महाविराट् ६७ यतो भवंति वि
श्वानि स्थूलसूक्ष्मादिकानि च पुनस्तत्र प्रलीयंते प्र
वेमेव स्मृतमेकूः ६८ गोलोकदूर्ध्वं वैकुंठात्संचाशको

ब्र·
वै·ग·
५५

94

रिपोजने नास्ति लोकस्त्वहृद्वैव नास्ति कस्मात्स्मरः प्रभुः
इदं श्रुत्वा तेशंभुस्त्वबोधे द्रष्टुं यथाच्छुते तत्क्षणेनतिष्ठाय
नाभ्रातरीश्वरः स्मरतोन्मुखिः ४२ इति श्रीब्रह्मवैवर्ते
कपुराणे नारायणनारदसंवादे गणपतिखंडे परशु
रामसंवादे द्विचत्वारिंशोध्यायः ४२ श्रीनारायण उ
वाच गणेशवचनं श्रुत्वा सत्तरावेगतः स्मयोः परशु
हस्तः परशुरामो निर्ययौ गंतुमुद्यतः १ गणेश्वरस्त्वं
दृष्ट्वा शीघ्रमुत्थाय यत्नतः वारयामास सश्रीमानवकार
विनयेन पुनः २ बभूव वत तत्रैव वाग्युद्धे हस्तकर्षणे
परशुनिलेपणं कतत्वेमनन्मकेमरगुस्तदा ३ हाहाकृत्वा
कार्तिकेयो वारयामास संसदि श्रुत्वार्थमसंहे भ्रात
गुरुपुत्रेकथ्यति पः ४ गुरुवक्तुरुपुत्रेवमाभवान्ह
नमहेसि परशुलेपयितं कुठारकपग्दलेलणे ५
गणेशं वाधयामास निवर्तस्वेत्युवाच ह पुनर्गणेश
रामस्य प्रेरयामास कोपतः ६ पपात हस्तगो वेगात्कि
त्रगात्रागजाननः गजाननः समुत्थाय धर्मं कृत्वा
तस्मात्तिणे ७ पुनस्तेवाधयामास जितकोपः शिवा
त्मजः निवर्तस्व निवर्तस्वेत्युवाच वच पुनः पुनः ८ प्रा
वेशनेमकाशक्तिरीश्वराज्ञेविना विभो ममभ्रातापि
मतिथिविश्वासेवेपुनोपुवे ९ ईश्वरप्रियशिष्यस्य

सहास्मितेन हेरम्बना नत्वाहं कार्तवीर्यश्च भूपालस्तत्र
जेतवः ९ अपि विष्णुनजानासिमांच विश्वेश्वरात्मजं
त्वर्गे तिष्ठति वर्तस्वसमये यत्रास्मरणा तिथे १० त्वर्गेतरे
त्वयामार्थयास्मामीश्वर से निर्थि श्रीनारायण उवाच
हेरम्बवचनं श्रुत्वा प्रजहास पुनः पुनः ११ पश्चिलं पमन
श्चक्रे प्रणम्य शंकरे हरिं पर्श्वत्तिपतं कोपेन पश्चशुंभं
गजाननः १२ दृष्ट्वा सम्मुखं देवेशं पर्मं कृत्वा सहितं
चकार हस्तं योगेन सप्तदशकोटियोजनं १४ योगीन्द्र
स्तत्र संतिष्ठन्भ्रामयित्वा पुनः पुनः शतधा वेष्टयित्वा
तं भ्रामयित्वा तत्रैव १५ ऊर्ध्वंगतोतिगर्वेण लम्बदाहिं
गरुडो यथा सप्तद्वीपान् शैलांश्च कानने सप्तसागरा
न् दर्शयामास रामे योगेन स्तंभिते हस्तपाद
घनायते जाड्यसर्वांगकंपिते १७ पुनस्तं भ्रामयामा
स दर्पिते दर्पनाशने भूर्लोकं च भुवर्लोकं स्वर्लोकं च
स्वरेश्वरः १८ जनलोकं तपोलोकं दर्शयामास लीलया
सत्यलोकं ब्रह्मलोकं ध्रुवलोकं च तत्परं १९ गौरीलो
कं शंभुलोकं दर्शयामास नारद दर्शयित्वा तु ब्रह्माण्डं
सप्तपौप्समसागरान् २० पुनरुद्गिरणं चक्रे सप्तमं क्षीरसा
गरोदके तत्र तमर्पयामास गंभीरे सागरोदके २१
सम्मूर्छं संचरेते ते पुनर्जग्राह लीलया पुनस्तत्र भ्राम

ब्र॰
वै॰ ग॰
५५
95

पिताब्रह्मांडगर्द्धिश्वतमं २२ वैकुंठंदर्शयामाससस्त
क्ष्मीचजनार्दनं ततस्तत्रभ्रामयित्वायोगींद्रोयोगमाय
या २३ पुनःकरंचयोगेनवर्द्धयामासलीलया गोलो
कंदर्शयामासविरजावनदीश्वरी २४ वृंदावनंशतशृं
गशैलेंद्रंरासमंडलं गोगोपगोपीभिःसार्द्धंश्रीकृष्णंश्या
मसुंदरं २५ द्विभुजंमुरलीहस्तंसस्मितंसुमनोहरं रत्न
सिंहासनस्थंचरत्नभूषणभूषितं २६ तेजसांकोटिसू
र्यभंराधावक्षःस्थलस्थितं एवंकृष्णंदर्शयित्वाप्रण
म्यचपुनःपुनः २७ ततोनलंवमानस्यभ्रामयित्वापु
नःपुनः दृष्ट्वाकृष्णमिष्टदेवंसर्वपापप्रणाशनं २८
भ्रूणहत्यादिकंपापंभस्मीभूतंवभूवह नभवेयातना
नष्टाविनाभोगेनपापजा २९ स्वलोकंचपुभजेरामाया
नाम्नाकृष्णदर्शनात् ततोनचेतनांप्राप्यपपातवेग
तोभुवि ३० वभूवहरीभूतंचगणेशांतमनंस्थले स
स्मारकवचस्तोत्रंगुरुदत्तंसुदुर्लभं ३१ अभीष्टदेव
श्रीकृष्णंगुरुंशंभुंजगद्गुरुं चिंतेपपद्मसम्पर्शंशि
वतुल्येवतेजसा ३२ ग्रीष्ममध्याह्नमार्तंडप्रभाशातगु
णस्तुते पितरंव्यस्थमसेवचदृष्ट्वागणपतिस्वयं ३३ ज
गाहमंदविनंतनांस्वर्ण्यचकारह निपत्यपर्शवेग
नविष्णादंतेसमूलके ३४ जगामवामहस्तंचमहादे

ववरेणैव ह्याहेतिशब्दमाकाशेदेवाश्चक्रुर्महाभि
यः ४५ वीरभद्रः कार्त्तिकेयः क्षेत्रपालाश्च पार्षदाः प
पातभूमौदेवस्य सरंभः शब्दमुच्चरन् ४६ यथा गौरि
कशुकस्य महास्फटिकपर्वतः शब्देन महता विश्वव
केपृथिवीभिया ४७ कैलासस्यजनाः सर्वे मूर्छामापुः
तगोभिया निद्राबभंजनिद्रायानिदेशस्यजगत्प्रभोः
४८ आजगामवह्निः शंभुः पार्वत्या सहसंभ्रमात् पुरो
ददर्शहेरंबंलोहितांतेततनतने ४९ भयदंवीक्षितक्रो
धेसस्मितंलज्जितंमुने पप्रच्छपार्वतीशीघ्रंस्कंदंस्वामि
तिसुतकं ५० सर्वतां कथयामास वार्त्तांपौर्वापरांभिया
शुकोपदुर्गाहृक्तपयाहरोदतेसुरूस्तुह्रः ५१ उवाचशंभोः
सुरतः पुत्रं हस्तेनास्वव तनसिसंबोध्यधर्माभुः शोकेन भि
याविनयपूर्वकं ५२ उवाचप्रणतासाध्वीप्रणतार्त्ति
हरंपति ५३ इतिश्रीब्रह्मवैवर्त्तेमहापुराणेनाराय
णनारदसंवादेगणपतिखंडेगणेशाख्यकृतेभग्नोना
मचिचत्वारिंशोध्यायः ४२ श्रीपार्वत्युवाच सर्वेजाने
तिजगतिदुर्गाशंकरकिंकरी अनेनदारहिंनादासी
तस्याश्चजीवनंहृथ्याईश्वरस्यसमासर्वाःस्थाणपर्वत
जातयः दासीपुत्रस्यशिष्यस्यकस्यदोषइतिप्रभो २
विचारंकर्तेमुचितंत्वंचसर्वविदांवरः वीरभद्रःका

ब्र॰
वै॰ ग॰
९८

96

त्रिकेयः पार्षदाः संति साक्षिणः ॥ ३ ॥ साक्षे मिथ्या को वदे
द्विद्वावेषां भ्रातरौ सखे मो साक्ष्ये समे मो शत्रुमित्रे समं धर्म
निरूपणे ॥ ४ ॥ साक्षो मम भार्यायस्मात्स्वजनो नाथ्याम्यथाव
देत कामतः कोपतो वापि लोभेन च भयेन च ॥ ५ ॥ सया
ति कुंभीपाके च निपात्य शतपूरुषैः तैस्सार्द्धं वसति तत्र
यावच्चंद्रदिवाकरौ ॥ ६ ॥ अहं विवोपि वेशकान्निर्णिद्री
वहयोरपि तथापि न वसाक्षांतान्ममस्याज्जानिंदितासुतो
॥ ७ ॥ किं करोणि प्रभो कुत्र रूपवंस्त्यति संप्रति ॥ ३ ॥ दिते भा
स्करेष्टद्यां विधाता हि यथा प्रभो ॥ ८ ॥ सुचिरं तपसा श्रा
मेनरदीयं चरणांबुजे परित्याग भयेनैव वसंते भीत
या मया ॥ ९ ॥ यत्किंचित्कोपशोकाभ्यामुक्तो माहेन तत्प्र
रे तत्क्षमस्व जगन्नाथ पुत्र स्नेहाद्वदाम्यहम् ॥ १० ॥ त्वया
यदि परित्यक्ता नदा सा स्तनशोनेन किं साध्याः सन्ति प्रजा
ताप्याः शत पुत्राधिकः पतिः ॥ ११ ॥ असत्कुंशप्रसूताया
डः शीलाज्ञानवर्जिता स्वामिनेम ममतेना सोपि श्रद्धोष
णा कुत्सिता ॥ १२ ॥ कुत्सितं पतितं मूढं दरिद्रं रोगिणं जडं
कुलजा विष्णुतुल्यं च कांतं पश्यति संततं ॥ १३ ॥ हुताशनो
वा सूर्यो वा सर्वतेजस्विनां परः पतिव्रतातेजसश्च क
लां नार्हति षोडशीं ॥ १४ ॥ महादानानि पुण्यानि व्रता
न्यनशनानि च तपांसि पतिसेवायाः कलां नार्हंति षोडशीं

पुत्रो वापि पिता वापि वांधवो वा सहोदरः योषितो
कुलजातानां न कश्चित्स्वामिना समः १९ इत्युक्त्वा स्वा
मिनं दुर्गा ददर्श पुरतोम्बुजे शंभोः पदाब्जे सेवंते नि
र्भयं तत्सुवाच ह १७ पार्वत्युवाच श्रूयेताम महाभाग
वत्स वेश्या त्रिपंडितः पुत्रोसि जमदग्नेश्च शिष्यश्च
वरयोगिनः १८ माता ते रेणुका साध्वी पद्मांशा शक्तकु
लोद्भवा मातामहो वै सत्वश्च मातलक्ष्मणतोधिकः
ते च रेणुकस्तूपस्समनुवंशोद्भवस्य च दौहित्रो मात
लः साधुः सूर्यविस्तृकृशानुरूपः २० कस्य दोषो गण
दुःखं ते न जाने दैवमीहितं येषां दोषं जनो हृष्टल्पव
त्सुत्रदुःखमानसाः २१ अस्यैवं प्राप्य पर्शुं च गुरोर्भक्त्रकरु
णानिधेः पर्शीतां तत्त्रिये कृत्वाव भूवनत्स्वेत पुत्रः २२
गुरवे दत्तिरण्दातस्तु विते तं तु तो शुते भयोदेनत्त
स्वतनस्य च छेदयत्सूसमस्तके २३ गणेश्वरं रणे जित्वा
स्थितश्चैव दोवयोः पुरः श्वाभ्यालव्यपरोभूत्वा हृजितो
भूजग उवेथ २४ पर्शुना मातृवीर्येण शंकरस्य वरेण
च हंतुं शक्तः शृगालश्च सिंहं शार्दूलमातुर्भुक २५
त्वद्विधं लक्षकोटिं च हंतुं शक्तो गणेश्वरः जितेंद्रिया
णां प्रवरो न हि हंति च मक्षिकां २६ तेजसा कृत्स्नतः
ल्यां ये कृत्स्नाशास्त्र गणेश्वरः देवाश्चाये कृत्स्नकलाः २७

वृ
स्त्रं· वे·
५१
97

ज्ञास्य पुरतस्थितः २१ तत्प्रभावतः श्रीमः शंकरस्य
वरेणच शोकेनातिकठोरेण नहिंसंपतितद्विना
श्मस्थाणवेतीरोषात्तेनाम्भेशाम्पुयता समः सस्मा
रते हृत्संप्रणास्य मनसा गुरुः २२ एतस्मिन्नन्तरे दुर्गा
ददर्श पुरतो हि जं श्रीनीववामनं बालसूर्यकोटिस
मप्रभं २३ शुक्लदन्तं शुक्लवस्त्रं शुक्लयज्ञोपवीतिनं द
ण्डिनं कुण्डिनं चैव दधानं तिलकोत्तमं २४ दधानं वलमी
मालां सस्मितं सुमनोहरं रत्नकेयूरवलयै रत्नमाला
विभूषितं २५ रत्ननूपुरपादं च सद्रत्नमुकुटोज्ज्वलं र
त्नकुण्डलयुग्मेन गण्डस्थलविराजितं २६ स्थिरमुद्रां
दर्शयन्तं भक्तेभ्यो वामकरेण च दत्ताभयमुद्रां च भक्ते
शं भक्तवत्सलं २७ बालिकाबालकगणैर्नागरैः स
स्मितैर्वृतं कैलासवासिभिः सर्वैराहूतैः तस्मिंस्त
दा तं दृष्ट्वा सम्भ्रमाक्षेपुः सहसा ततः सपुत्रकं भस्मापू
र्णं व्रणनाशं तु गौरी चेदं ववृधि २८ आशिषं प्रददौ बा
लः सर्वेभ्यो वाञ्छितप्रदः ते दृष्ट्वा बालकाः सर्वे सवा
ल्यं पुष्पभिया दत्तास्तेभ्यः शिवो भस्मावेयवालोघादश
प्रजो च कारषु सत्कोपरि शरणं तमस्य च त्वष्टावकाएव
शाबोक स्तोत्रेण नन्दकेश्वरः पुलकोवितसर्वाङ्गो भगव
न्तं सनातनं रत्नसिंहासनस्थं तं पुत्रवाच शंकरः स्वयं

अतीवतेजसा सर्वं प्रज्वलीकृतमेव च ५० शंकरश्चाव
आत्मारामेषु कुशलप्रश्नोतीव विदेवने तेषाम्स्वकुश
लाथारा: कुशला: कुशलप्रदा: ५१ अद्य मे सफलं जन्म
जीवितं च सुजीवितं प्राप्तस्त्वमतिथिर्व्वेलात्कस्य सेवा
फलोदयात् ५२ परिपूर्णतमः कस्तो लोकनिस्तारहे
तवे कलयापूर्ण एते त्रैव भारते वह्निपापानि यैः ५३ अति
थिः पूजितो येन पूजिताः सर्वदेवताः अतिथिर्यस्य संत
ष्टस्तस्य तुष्टो हरिः स्वयं ५४ स्नानेन सर्वतीर्थानां सर्व
दानेन यत्फलं सर्वव्रतोपवासाभ्यां सर्वयज्ञेषु दीक्ष
या ५५ सर्वैस्तपोभिर्विविधैर्नित्यैर्नैमित्तिकादिभिः दे
वतातिथिसेवायाः कलां नार्हन्ति षोडशीं ५६ सोऽति
थिर्यस्य भग्नाशो याति रुष्ट्या मंदिरात् कोटिजन्मार्जि
तं पुण्यं तस्य नश्यति निश्चितं ५७ स्त्रीगोघ्नश्च कृतघ्न
ब्रह्मघ्नो गुरुतल्पगः पितृमातृगुरूणां च निंदको
नरघातकः ५८ संध्याहीनोऽश्वयाती मत्तो हरिनिं
दकः ब्रह्मस्वस्यापहारी च मिथ्यासाक्ष्यप्रदायकः ५९
मित्रद्रोही कृतघ्नश्च वृषवाहः स्वरूपकृत् शवदाही
ग्रामयाजी ब्राह्मणो वृषलीपतिः ६० शूद्रश्राद्धान्नभोजी
च शूद्रश्राद्धेषु भोजकः कन्याविक्रयकारी च श्रीहरे
र्नामविक्रयी ६१ लाक्षामांसलोहरसतिलानां लवणा

स च विक्रेता ब्राह्मणेष्वेव वरगानां गवां तथा ५२
एकादशीकृत्स्नसेवाहीनो विप्रश्च भारते एते महापा
तकिनस्त्रिषु लोकेषु निन्दिताः ५३ कालसूत्रे च नरके प
तन्ति ब्राह्मणाः शान्ते एतेभ्यो पापयमः सोपि यस्यातिथिः
पराङ्मुखः ५४ श्रीनारायण उवाच शंकरस्य वचः श्रुत्वा
संतुष्टः श्रीहरिः स्वयं मेघगंभीरया वाचा वाचातश्च वाचस्
पतिः ५५ विष्णुरुवाच श्वेतद्वीपादागतोऽहं दृष्ट्वा को
लाहलं वचः पञ्चग्रामस्य रक्षार्थं कृत्स्नभक्तस्य साम्प्रतं
५६ नैतेषां कृत्स्नभक्तानाममशुभं विद्यते क्वचित् रक्षामि
तांश्च चक्रहस्तोऽनुरूपः पवितः शिवः ५७ नाहं पातनां गेरु
हे बलवद्गुरुहेलने न स्मरः पातकीनां स्तिमेवाहीना
गुरोश्चयः ५८ मातुः पूज्यश्च सर्वेभ्यः सर्वेषां जनको
भवेत् श्रेष्ठो यस्य प्रसादेन सर्वान्पश्यति मानवः जनको
जन्मदाता च रक्षणाच्च पिता स्मृतः ततो विलीय कन्यां
कल्यां स प्रजापतिः ६० पितुः शतगुणैर्माता पोषणा
त्कर्मधारणात् वंद्या पूज्या च मान्या च प्रशस्तरूपा वसुंधरा
६१ मातुः शतगुणैर्वंद्यः पूज्यो मान्यो मंत्रदायकः यदि ना
न्यथो देहो विप्रश्च कलपानदः ६२ मंत्रदातुः शतगु
णो भीष्टदेवः परः स्मृतः गुरुस्तस्मात्समगुणो विद्या
मंत्रप्रदायकः अज्ञानतिमिरान्धं तं ज्ञानदीपेन चक्षुषा

यः सर्वार्थं दर्शयति तत्परः कोस्ति वांधवः ९४ सर्वज्ञ
यति सर्वत्र विषयाद्गुरुदत्तया यस्मात्स्तुज्ञो हि जगति
कोवा वंधुस्ततोधिकः ९५ विद्यां यो वा धनं यो वा योम्
द्दानं भजेद्गुरुं सोऽश्रुविस्तीर्थस्नानतोपि नाधिकारी च
कर्मसु ९६ पितरं मातरं भार्यां गुरुपत्नीं गुरुं परं यो दु
ष्यति नकामश्चात्स महापातकी शिव ९७ गुरुर्ब्रह्मा गु
रुर्विष्णुर्गुरुर्देवो महेश्वरः गुरुर्देवः परं ब्रह्म गुरु
र्भास्कररूपकः ९८ गुरुश्चंद्रस्तथैवेंद्रश्च वायुश्च वरुणो
मतः सर्वरूपोपि भगवानस्मन्मान्मात्स्वयं गुरुः ९९ ना
स्ति वेदात्परं शास्त्रं न हि कस्तात्परः स्वरः नास्ति गंगासमं
तीर्थं न तु छंदस्तुलसीसमं १० नमाधवाद्भयरामः पुत्रा
त्रास्यपरः प्रियः नचैवास्पर्शाक्तो व्रतं नैकादशी
विना ११ सालग्रामात्परो देवो नतत्वं भारतात्परं पु
ण्यस्थलानां च पुण्यं हृदावनं यथा १२ मोक्षदानां यथा
काशी वैष्णवानां यथा शिवः न पार्वतीसमा साध्वी नद्यां
गंगासमा नदी तथा गुरुसमो नास्ति परात्परतरो भुवि प
रं संमार्जने कर्तुमागतोहं तवालये १५ श्रीनारायण
उवाच इत्येवमुक्त्वा शंभुं चतुर्गासं वो ध्यन नारद उवाच
भगवांस्तत्र सत्यमारपरं वचः १८ श्रीविष्णुरुवाच ।
श्रृणु देवि प्रवक्ष्यामि मदीयं वचनं शुभं हितं तिरं वेदसा

त्रे. वै. ग. ९५

99

रेपरिणामस्तवोवहं ७७ यथा ते गजवक्त्रस्य कार्त्ति
केयस्य पार्वति रामस्तथा ते पुत्रोपि नास्त्येव नूनतामस
ति ७८ नास्त्येव स्तनहेरंबस्य तनवाशंकरस्य च विचार्य
सर्वसर्वज्ञे कुरु मातर्यथोचितं ७९ पुत्रेण सार्कं पुत्रस्य
विवादो दैवदोषतः दैवहंते कोपि शक्तो दैवं च बलव
त्तरं ८० पुत्राभिधाने वेदेषु पशुपवत्स्तवगानने एकदंत
इति ख्यातं सर्वदेवनमस्कृतं ८१ पुत्रनामाष्टकं स्तोत्रं
सामवेदोक्तमीश्वरि शृणुष्वावहितमत्तः सर्वविघ्नहरं
परं ८२ विघ्नरूपाय गणेशमेकदंतं च हेरंबं विघ्ननाय
कं लंबोदरं शूर्पकर्णं गजवक्त्रं गुहाग्रजं ८३ नामाष्टका
र्थं पुत्रस्य शृणु मनोहरप्रिये स्तोत्राणां साररूपं च सर्व
विघ्नहरं परं ८४ ज्ञानार्थवाचको गश्च णश्च निर्वाणवा
चकः तयोरीशं परं ब्रह्म गणेशं प्रणमाम्यहं ८५ एकश
ब्दः प्रधानार्थो दंतश्च बलवाचकः बलं प्रधानं सर्वस्माद
कदंतं नमाम्यहं ८६ दीनार्थवाचको हेश्च रंबः पालनवा
चकः परिपालकं हि दीनानां हेरंबं प्रणमाम्यहं विपत्तिवा
चको विघ्नो नायकः खंडनार्थकः विपत्खंडनका
रं तं नमामि विघ्ननायकं ८८ विष्णुदत्तैश्च नैवे
द्यैर्यस्य लंबोदरं पुरा पित्रा दत्तैश्च विविधैर्वंदे
लंबोदरं च तम् ८९ ८९ ८९

सूर्पकर्णौ चयत्कर्णौ विघ्नवारणकारणौ ॥ संपदां
स्फालरूपौ च सूर्पकर्णं नमाम्यहं १० विष्णुप्रसादपुष्पं
च यन्मूर्ध्नि मुनिदत्तकं तद्गजेन्द्रवक्त्रयुक्तं च गजवक्त्रं
नमाम्यहं ११ गुहस्याग्रे च जातोयमाविर्भूतो हरालये
वंदे गुहाग्रजं देवं सर्वदेवाग्रपूजितं १२ एतन्नामाष्ट
कं दुर्गे नामार्थसंयुतं परं पुत्रस्य पश्य वेदे च तथा को
पं तथा कुरु १३ एतन्नामाष्टकं स्तोत्रं नामार्थसंयुतं शु
भं त्रिसंध्यं यः पठेन्नित्यं स सुखी सर्वतो जयी १४ ततो
विघ्नाः पलायंते वैनतेयाद्यथोरगाः गणेश्वरप्रसादेन
महाज्ञानी भवेद्ध्रुवं १५ पुत्रार्थी लभते पुत्रं भार्यार्थी वि
पतिव्रतां लक्ष्मीकामस्तथामर्त्यो लभते विपुलां श्रियं
महाज्ञः कवीन्द्रश्च विद्यावादी भवेद्ध्रुवं १६ इति श्री
ब्रह्मवैवर्ते महापुराणे नारायणनारदसंवादे गण
पतिखंडे गणेशस्तोत्रकथनं नाम चतुश्चत्वारिंशत्त
माध्यायः ४४ श्रीनारायण उवाच पार्वतीवाथ यत्विवा
न विष्णुरामसुवाच ह हितं सारं नीतिसारं परिणाम
सुखावहं १ विष्णुरुवाच राम त्वमप्रनामसमपरा
धी श्रुतं मम कोपात्कृतो दंतभंगो गणेशस्य स्थिते शि
वे २ मयोक्तेनैव स्तोत्रेण स्तवनागणपतिं परं कारय
शारिवाक स्तोत्रेण स्तोहि दुर्गां जगतां प्रसूं ३ श्रीकृष्णस्य

ब्र.
वै. ग.
१०

10°

पराशक्तिर्बुद्धिरूपाजगतस्प्रभोः अस्याश्चनवरुद्धायाहत
बुद्धिर्भविष्यति ४ सर्वशक्तिस्वरूपेयमनयाशक्तिम
ज्जगत् अनयाशक्तिमानात्मासौ निर्गुणः प्रकृतेः परः ५
सृष्टिं कर्तुं न शक्तश्च ब्रह्मसः शक्त्यानयाविना वयमस्याः
प्रसादाच्च ब्रह्मविष्णुमहेश्वराः ६ सुरसंघे सुरश्रेष्ठ काल
योरन्तरे द्विज तेजसः सर्वदेवानामाविर्भूता पुरा सती
७ कृत्वाज्जयासुरान्हत्वादत्वाभ्यः पदं ततः दक्षपत्न्याज
निलेभे दक्षस्य तनया पुरा ८ भार्या भूत्वा शंकरस्य पुनः
पत्युश्च निंदया देहं सन्त्यक्त्वा ईद्रपत्न्याजनिलेभे पुनः स
ती ९ शंकरस्तपसा लब्धो योगीन्द्राणां गुरुर्गुरुः लब्धो
गणपतिः पुत्रः कृत्स्नोशः कृत्स्नसेवया १० यमेव ध्यायसे
नित्यं तेन जानासि बालक स एव भगवान्कृत्स्नस्वांशेन
पार्वतीसुतः ११ पुटांजलिपुटो भूत्वा स्तौहि दुर्गां शिव
प्रां शिवां शिवप्रदां शैवां शिववीजां शिवेश्वरीं १२ शिव
योः स्तोत्रराजेन कृतेन धूर्जटिना पुरा त्रिपुरस्य वधे घोरे
ब्रह्मणाप्रेरितस्य च १३ इत्युक्त्वा काश्यपः शीघ्रं जगाम स्वा
निकेतनः गते हरौ हरिः स्मृत्वा तामस्तौत्स्तोत्रमुद्य
तः १४ विसृष्टेन तेन स्तोत्रेण सर्वविघ्नहरेण च ध
र्मार्थकामसमेतानां कारणेन च नारद १५ पुटां
जलिपुटो भूत्वा स्नात्वा गंगोदके शुभे ॥

गुरुं प्रणम्य भक्त्यांशं धृत्वा धौते च वाससी १८ आचम्य
त्वा मूर्ध्नि तां देवीं न्यस्तात्मकं दरः पुलकांकितसर्वांग
श्चानंदाश्रुसमन्वितः १७ पश्चाद्रासमंडले च श्रीकृष्ण
स्य च गोलोके परिपूर्णतमस्य च आविर्भूता विग्रहतः
पुरा सृष्ट्युन्मुखस्य च १९ सूर्यकोटिप्रभायुक्ता रत्ना
लंकारभूषिता वह्निशुद्धांशुकाधाना सस्मिता सुमनो
हरा १९ नवयौवनसंपन्ना सिंदूरबिंदुशोभिता ललि
ताकवरीभारा मालतीमाल्यमंडिता २० अहो निर्वचना
या देवी मूर्तिं च बिभ्रती मोक्षप्रदा मुमुक्षूणां महा
विष्णोर्विधिः स्वयं २१ मुमोह क्षणमात्रेण दृष्ट्वा तां सर्व
मोहिनी रेमे संभूय महसा सस्मिता राधिका पुरा २२
सा विष्णोत्मनंतानां माया मूलप्रकृतिरीश्वरी कृष्णस्यांस
हसा ज्ञाय वीर्याधानं चकार ह २३ ततो डिंभं महत्त्वे
यतो महान्विराट् यस्यैव लोमकूपेषु ब्रह्मांडान्यखि
लानि च २४ तस्यैव गार्ह्यमेतेन वह्निः श्वासो बभूव ह
नतं स्वयं च या भूता पंचमूर्तिं च बिभ्रती २५ प्राणाधि
ष्ठात्रीया मूर्तिः कृष्णस्य परमात्मनः कृष्णप्राणाधिका
राधा तां विदंति पुराविदः २६ वेदाधिष्ठात्री या मूर्तिर्वे
दशास्त्रप्रसूरपि तां सावित्रीं शुद्धरूपां प्रवदंति मनी
षिणः २७ ऐश्वर्याधिष्ठात्री या मूर्तिः शांतिस्वरूपिणी

ब्र॰
वै॰ग॰
१०१

(101)

लक्ष्मीवदंतिसंततंसाशुद्धसत्वस्वरूपिणी २८ वागधि
ष्ठात्रीयादेवीशुक्लमूर्तिःसतांप्रसूः सरस्वतींतांशास्त्र
ज्ञाशास्त्रज्ञाःप्रवदंत्यहो २९ बुद्धिविद्यासर्वधासर्वशक्ति
र्यासुकेरपिदेवता सर्वमंगलदांसंतोवदंतिसर्वमंगलां॰
सर्वमंगलमंगल्यासर्वमंगलरूपिणी सर्वमंगलबीज
स्याशिवस्यमंदिरेधुना ३० शिवेशिवास्वरूपात्वंलक्ष्मीर्ना
रायणांतिके सरस्वतीवसावित्रीवेदसूःब्रह्मणःप्रिया
३१ राधेरासेश्वरस्यैवराधायापरिपूर्णतमस्यच परमानंदरू
पस्यपरमानंदरूपिणी ३२ छायासूर्यस्यचेंद्रस्यरोहि
णीसर्वमोहिनी शचीशक्रस्यकामस्यकामिनीरतिरी
श्वरी ३४ वरुणानीजलेशस्यवायोस्त्रीप्राणवल्लभा व
ह्नेःप्रियाथास्वाहावकुवेरस्यचसुंदरी ३५ यमस्यचसु
शीलाचैनैर्ऋतस्यचकोटराट् ईशानस्यशशिकला
शतरूपामनोःप्रिया ३६ देवहूतिःकर्दमस्यवसिष्ठस्या
प्यरुंधती अदितिर्देवमातायामुद्रागस्त्यमुनेःप्रिया
३७ अहल्यागौतमस्यापिसर्वाधाराचसुंधरा गंगाचतु
लसीचापिपृथिव्यांयासरिद्वरा ३८ एताःसर्वाश्चया
अन्याःसर्वास्तत्कलयांबिके गृहलक्ष्मीर्गृहेनृणांरा
जलक्ष्मीश्चराजसु ३९ तपस्विनांतपस्याचगायत्रीब्रा
ह्मणस्यच सतांसत्वस्वरूपात्वमसतांकलहांकुरा ४०

ज्योतीरूपा निर्गुणस्य शक्तिस्त्वं सगुणस्य च सूर्ये प्र
भास्वद्रूपा त्वं दाहिका चाग्नौ नाशने ४१ जले रसस्वरूपा
वशोभारूपा निशाकरे त्वं भूमौ गन्धरूपा वाकाशे
शब्दरूपिणी ४२ त्वं क्षुत्पिपासादयस्त्वं च जीविनां सर्व
शक्तयः सर्वबीजस्वरूपा त्वं संसारे साररूपिणी ४३
स्मृतिर्मेधा च बुद्धिर्वा ज्ञानशक्तिर्विपश्चितां कृष्णे
न विद्यायाः दत्ता सर्वज्ञानप्रसूः शुभा ४४ शूलिने कृ
पया सा त्वं यया मृत्युंजयः शिवः सृष्टिपालनसंहारश
क्तयस्त्रिविधाश्च याः ४५ ब्रह्मविष्णुमहेशानां सात्व
मेव नमाम्यहं ते मधुकैटभभीतश्च ब्रह्मा यया नाप्रकं
पितः ४६ स्तवात्समो वचां देवीं तां मूर्ध्ना प्रणमाम्य
हं मधुकैटभयोर्युद्धे त्रातासौ विष्णुरीश्वरी ४७ बभू
व शक्तिमान्स्त्वां दुर्गां तां प्रणमाम्यहं विष्णुना वृष
रूपेण स्वयं शंभुः समस्थितः ४८ जघान त्रिपुरं स्त
त्वा यो दुर्गां तां नमाम्यहं यदाज्ञया वाति वातः सूर्यस्त
पति संततं ४९ वर्षतीन्द्रो दहत्यग्निस्तां दुर्गां प्रण
माम्यहं स्वाज्ञया सृजति सृष्टिं च पाता याति यदाज्ञया
संहर्ता संहरेत्काले तां दुर्गां प्रणमाम्यहं ज्योतिःस्व
रूपो भगवान्श्रीकृष्णो निर्गुणः स्वयं ५० यया विना
न शक्तः सृष्टिं कर्तुं नमामि तां रतरतजगन्मात

रपराधं त्वमस्व मे ५२ शिशूनामपराधेन तोषमा
तानक्रुध्यति इत्युक्त्वा पश्चाद्रामस्य प्रणम्य तां हृदे
दह दुर्गां तस्या संभ्रमेणैवाभयं च वरं ददौ स्व मे रोम
वमस्तु वत्स ह्रिष्यिरतां व्रज ५४ शर्वप्रसादात्सर्वत्र
जयो स्तु तव संततं सर्वांतरात्मा भगवान् स्वेष्टो स्तु संत
तेहरिः ५५ भक्तिर्भवतु ते कृष्णे शिवदेवे शिवे गुरौ
इष्टदेवे गुरौ यस्य भक्तिर्भवति शाश्वती ५६ तेह तेन
हि शक्ताः सर्वे रुष्टा स्य सर्वदेवताः श्रीकृष्णस्य वरभक्तं
शिष्या पि शंकरस्य च ५७ गुरुपत्नी भयातो हि कस्ता
हं तमिहेश्वरः ब्रह्मा न कृष्णभक्तानां स्वप्नेभि विपत्ते क्व
चित् स्वप्न देवेषु ये भक्तास्तु कृत्वा ये निरंकुशाः तेषामे
व भवेद्भीतिरत्र संसारवर्त्मनि ५८ चंद्रमावलवान्स्त
होयेषां भागवतोत्तमो तेषां तारागणा रुष्टाः किं कु
र्वंति च दुर्बलाः ९० यस्य तुष्टः समो चेतनरदेवो महा
त्त्ववी तस्य किं वा करिष्यंति रुष्टा भस्मास्य दुर्बलाः ९१
इत्युक्त्वा पार्वती तुष्टा ददता रामे शुभाशिषं जगामांतःपु
रं गृहं हरिश्रेष्ठाव भूव ह कवचं शारीकस्तोत्रं च यज्ञाकाले
च यः पठेत् यस्य रुष्टो गुरुर्देवो राजा याचा यथोथवा त
स्य तुष्टश्च वरदः स्तोत्र राजप्रसादतः दस्युग्रस्तो हि यस्त
स्य शत्रुग्रस्तो भयानकः व्याधिग्रस्तो भवेन्मुक्तः स्तोत्रस्मरण
मात्रतः

राजद्वारे श्मशाने च कारागारे च बंधने १५ जलराशौ
निमग्नश्च मुक्तो भवति स्तोत्रतः स्वामिभेदे पुत्रभेदे
मित्रभेदे ति दारुणे १६ स्तोत्रस्मरणमात्रेण वांछिता
र्थं लभेद्ध्रुवं कृत्वा हविष्यं वर्षं च स्तोत्रराजं शृणोति या
१७ भक्त्या दुर्गां च संपूज्य महावंध्या प्रसूयते लभते सा चि
रं पुत्रं ज्ञानिनं चिरजीविनं १८ असौभाग्या च सौभा
ग्यं षण्मासश्रवणाल्लभेत् नवमासं काकवंध्या मृत
वत्सा च भक्तितः १९ स्तोत्रराजं या शृणोति सा पुत्रं ल
भते ध्रुवं कन्यामाता पुत्रहीना पंचमासं शृणोति या
घटे संपूज्य दुर्गां च सा पुत्रं लभते ध्रुवं २० इति श्रीब्रह्म
वैवर्ते महापुराणे नारदसंवादे गणपतिखंडे दुर्गा
स्तोत्रं नाम पंचचत्वारिंशतमोऽध्यायः ४५ श्रीनाराय
ण उवाच स्तुत्वा दुर्गां पर्शुरामो हर्षनिर्भरमानसः ह
रिणोक्तेन स्तोत्रेण संतुष्टाव गणेश्वरं १ पूजां च कार
भक्त्या च नैवेद्यैर्विविधैरपि धूपदीपैश्च गंधैश्च पुष्पैश्च
तुलसीं विना २ संपूज्य भ्रातरं भक्त्या सगणः शंकरा
ज्ञया गुरुपत्नीं गुरुं नत्वा गमनं कर्तुमुद्यतः ३ नारा
यण उवाच शृणु नारद वक्ष्येहमितिहासं पुरातनं ब्र
ह्मकल्पस्य वृत्तांतं निगूढं च मनोहरं ४ एकदा तुल
सी देवी प्रोद्भिन्ना यौवनान्विता तीर्थं भ्रमंती तपसा नारा

ब्र. वै. ग. १३

103

यणपरायणा ५ ददर्श गंगानीरे च गणेशं यौवनान्वितं
शतीव सुंदरं शुद्धं सस्मितं पीतवाससं ६ चंदनोक्षितस
र्वांगं रत्नभूषणभूषितं ध्यायंतं कृष्णपादाब्जं जन्ममृ
त्युजराहरं ७ जितेंद्रियाणां प्रवरं योगीशानां गुरोर्गुरुं
शनूपहार्य्यं निष्कामं सकामा तमुवाच ह ८ तुलस्युवाच
श्रये किं ध्यायसे देवेश शांतरूप गजानन कथं त्वं वा दं
देहे गजवक्त्रं कथं तव ९ एकदंतः कथं वक्त्रे वदाभि
भावकारणं त्यज ध्यानं महाभाग सायंकाल उपस्थितः
१० इत्युक्त्वा तुलसी तत्र जहास च पुनः पुनः पुनश्चेतसि
दग्धा सा कामबाणैः स्मरारुणैः ११ गणेशस्य प्रध्याने ग
दत्वा किंचिज्जलं मुने जघान तर्जन्यग्रेण निश्चलं कृष्ण
मानसं १२ बभूव ध्यानभंगश्च तस्य नारद चेतसि दुःखं च
च ध्यानभंगेन सहितो हितो हिंडः खेदः १३ ध्यानं त्यक्त्वा
हरिं स्मृत्वा ददर्श कामिनीश्वरः नवयौवनसंपन्नां सस्मि
तां कामपीडितां १४ तं वोदरस्थतां दृष्ट्वा परं विनयपूर्व
कं उवाच सस्मितः शांतः कांतां कामातुरां वधू १५
गणेश उवाच कांतं वत्से कस्य कन्या मातर्ब्रूहि किं
शुभे पापदोऽशुभदः शश्वत् ध्यानभंगस्तपस्वि
नाम् १६ कृष्णः सकलकल्याणं हंतु विघ्नकृपा
निधिः मद्ध्यानभंगजो दोषो न भवतु ते शुभे १७

गणेशवचनं श्रुत्वा तमुवाच स्मरातुरा सस्मितं स
कटाक्षं देवं मधुरया गिरा १८ तुलस्युवाच धर्म
ध्वजस्य कन्याहमत्रैव तपस्विनी तपस्या मे स्वामी
नो ऽर्थे नात्स्वामी भव मे प्रभो १९ तुलसीवचनं श्रुत्वा
गणेशः श्रीहरिं स्मरन् तमुवाच महाप्राज्ञः शान्त्या मधु
रया गिरा २० गणेश उवाच हे मातर्नास्ति मे वाञ्छा घो
रे दारपरिग्रहे दारग्रहो हि दुःखाय न सुखाय कदाच
न २१ हरिभक्तिविघातश्च तपस्यानाशहेतुकः मोक्ष
द्वारकपाटश्च भवबन्धनकारकः २२ गर्भवासकरः
शश्वत्तत्त्वज्ञाननिकृन्तनः संशयानां समारम्भः सर्वदा
साध्यान्तं हि विरोधि २३ गेहाहंकरणानीव सर्वे माया
करण्डकः साहसानां समूहश्च दोषाणां च विशेषतः
निवर्तस्व महाभागे पश्य पात्रकान्तरं पतिं कामुके
नैव कामुकाः संगमो गुणवान्भवेत् २४ इत्येवं वच
नं श्रुत्वा कोपात्सा शशाप ह दारयुक्तो भविता सा स्मा
क्षितिगणेश्वरं २५ इत्याकर्ण्य सुरश्रेष्ठः सा शशाप
शिवात्मजः देवि त्वमसुरग्रस्ता भविष्यसि न संशयः
तत्पश्चान्महतां शापात्वृक्षत्वं भविष्यति महातप
स्विनी मत्केऽपि विरामश्च न नारद २६ श्रुत्वा वचनं तत्तुलसी
प्ररुरोद पुनः पुनः तुष्टाव च सुरश्रेष्ठं स प्रसन्न उवाच

ब्र॰
वै॰ग॰
१०४

104

तो २९ गणेश उवाच शृण्वन्तो सारभूतां त्वं भविष्य
न्ति मनोरमे कैलाशेन महाभागे स्वयं नारायणप्रि
या १० प्रियात्वं सर्वदेवानां श्रीकृष्णस्य विशेषतः प्र
जाविष्णुकिरात्मणो मम माज्ञा च सर्वदा ११ इमं का
चस्रस्रेष्ठे जगाम तपसे पुनः हरेर्नारायणस्य श्राव
दरी सन्निधिं प्रिये १२ जगाम तुलसी देवी हृदयेन वि
दूयता निराहारा तपश्चक्रे पुष्करे लक्षवत्सरं १३ प
श्चान्मनी इश्वापेन गणेशस्य वचनात् सा प्रियाशाखे
वृक्षस्य च भूव सचिरस्मृते १४ ततः शंकरस्मृत्यैन स
मभारा महेश्वरः सा कैलाशेन हृतं त्वं स्वयं नारायण
प्रिया १५ कथितं भ्रातिहासं संक्षेपतः पंमहद्वाक्यसारा
मोत्तपुरुषसार अश्रृगणेशस्य प्रकीर्तितः १६ पञ्चरामो
महाभागो जगाम तपसेवनं प्रणम्य शंकरं दुर्गां स
पूज्य च गणेश्वरं १७ पूजितो वैदिकेनः सर्वैः सुरैर्मुनि
पुंगवैः पार्वती शिवसान्निध्येन तत्र तस्थौ गणेश्वरः १८
इदं गणपतेः स्तोत्रं यः शृणोति समाहितः स राजसू
ययज्ञस्य फलमाप्नोति निश्चितं १९ अपुत्रो लभते पु
त्रं श्रीगणेशप्रसादतः वीरं धीरं च पतिनं गुणिनं चि
रजीविनं ५० यशस्विनं पुत्रिणं च विद्वांसं सुकवी
श्वरं जितेन्द्रियाणां प्रवरं दातारं सर्वसंपदां ५१ सप

विघ्नसङ्घातविध्वंसस्तस्यैवं भवेत् सर्हिंसकं दयाले
वतत्वज्ञानविशारदे ५२ भक्त्या गणेशं सम्पूज्य वस्त्रा
लंकारचन्दनैः श्रुत्वा गणपतेः खण्डं महावैष्णवप्रस
यते ५३ मृतवत्सा काकवन्ध्या ब्रह्मपुत्रं लभेद्ध्रुवं
याहृषिता हृषिता या सा वस्त्रज्ञानं लभेत्सुतं ५४ कार्त्ति
के ब्रह्मवैवर्तं श्रुत्वा यल्लभते फलं तत्फलं लभते म
र्त्यः श्रुत्वेदं खण्डमुत्तमं ५५ वांछां कृत्वा तु मनस्वियः
स्तुतो परमात्मा स्थितः तस्मै ददाति सर्वेष्टं सर्वश्रेष्ठो ग
णेश्वरः ५६ इति श्रीब्रह्मवैवर्ते महापुराणे नारा
यणनारदसंवादे गणपतिखण्डे षट्चत्वारिंश
त्तमोऽध्यायः ४६ समाप्तश्चायं गणपतिखण्डः शु
भमस्तु सर्वजगतां ।। ॐ ॐ